नं० ४६६७ – १

सर्वदेव प्रतिष्ठा प्रयोगः

पत्राणि ८६

नं० ४८८८-घ

सर्वदेव प्रतिष्ठाप्रयोगः (पूर्ण)

नं० ५७७७-घ

पत्राणि ८६

५७७७/८६

पूर्ण

नं० ४६७७-घ

सर्वदेवप्रतिष्ठा प्रयोगः

पत्राणि ८६

दे॰प्र॰
१

ॐ श्रीगणेशाय नमः अथ सर्वदेवप्रतिष्ठां चिकीर्षुर्यजमानः पूर्वमेव न्यायार्जितद्रव्येण शिलामृद्दारुपक्वेष्ट
कादिना यथोक्तलक्षणं प्रासादं निर्माय देवतत्त्वबोधिते काले प्रासादसौधस्याग्रतः प्राग्वा मंडपभूमिं संशोध्य
समीकृत्य देवप्रासादप्रतिष्ठाप्रयोगः ॐ मंडपादिकर्त्ते गणेशं पूजयेत् यथा ग्रह्यं संस्थाप्य प्राणानायम्य
देशकालौ संकीर्त्य ममेहामुककरिष्यमाणदेवप्रासादप्रयोगे ॐ मंडपादीकर्मणि निर्विघ्नतासिद्ध्यर्थं गणप
ति पूजनं करिष्ये इति संकल्प संपूज्य कलशविधिना कलशं संस्थाप्य तत्रासनपूजनेषु ककुभं शोभवस्तुधा
वास्तुदेवतास्तन्नमोमैं संपूज्य पृथिव्यै फलपुष्पासनादि पूर्णमर्घं दद्यात् मंत्रः ॐ आगच्छ सर्वकल्याणि व
सुधे लोकधारिणि उद्धृतासि वराहेण सशैलवनकानना मंडपं कारयामि यत्नहं देवि शुभलक्षणं गृहाणार्घं
मया दत्तं प्रसन्ना शुभदा भव नम्र दत्वा ॐ स्योना पृथिवी नो भवान्तृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः इति मं
त्रेण भूमिं प्रार्थ्य द्विजतोषादिभिः संपूज्य दक्षिणाभिः संतोष्य तदाज्ञां गृहीत्वा यथोक्तलक्षणं मंडपादिकं
कृत्वा यथा प्रागुदक्प्रवणे देशे हस्तषोडश संमिते चतुरस्रं चतुर्द्वारं मंडपं कारयेद्बुधः इति दिक्कल्पतन्त्रोक्तविधा
य तत्र यामविस्तारयोर्मध्ये षोडशहस्तं सूत्रद्वयं दत्वा चतुरस्रं तत्क्षेत्रं नवधा विभज्य तत्र सूत्रसमपातेषु स
र्वपातसमयाः समा निच्छिद्रा वर्तुला हस्तमिताः षोडश स्तंभाः स्थाप्याः पंचमोच्छ्रिता निवेश्याः तथा मध्यभागकोणच
तुष्टये चत्वारो द्वादशहस्ता स्थापनप्रकारश्च प्रथममाग्नेय्यां वटे दूर्वाहरिद्राक्षतयवसिद्धार्थान्प्रक्षिप्य वायव्यादि रवेजा
यमानो ॐ उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि सुमिती मीयमानो वर्चो धा यज्ञवाहसे इति मंत्रेण स्तंभ
स्थाप्य ॐ ऊर्ध्व ऊषु ण ऊतये तिष्ठा देवो न सविता ऊर्ध्वो वाजस्य सनिता यदंजिभिर्वाघद्भिर्विह्वयामहे
इति मंत्रेण वटे रोपयेत् ततो वटपोषणभिः पूरयित्वा स्तंभेनिवसिद्धार्थाक्षतगोमयस्वर्णशाकलादिगर्भपो

ॐ नि घ

दलिकां वधायेयादिभिरलंकृत्य यतो यतः समीहसे ततो नो अभयं कुरु शन्नः कुरु प्रजाभ्यो ऽभयन्नः इति प्रार्थयेत्
प्राग्यादिक्रमेण स्तम्भे वेशानपर्यन्तमन्येऽत्र यस्तंभाः स्थाप्याः ततः पादशिलोपनावास्थावैदेषु स्तंभरोपणं पोटलिका
वेष्टने गवादिनापूजनं च विधेयं तेन स्तंभाः प्रंचहस्ता द्वादश सर्वे द्वादशांगुल सूत्रवेष्टनयोग्याः दशांगुलविस्तृ
ता वा मध्यस्तंभचतुष्टय चूडास्तु सच्छिद्रकाष्ठानि प्रागुदिता पश्चिमोत्तरायतानि च स्थापितव्यानि तदुपरि स्तर
णाकृतिकाष्ठेशानाग्नेयकोणादिविदिग्गतकोष्ठाष्टकेन शिखरबद्धरूपमाकार्या बाह्यस्तंभेषु तु चूडाग्रकोणेषु वा
तिर्यक्काष्ठनिवेशनं तेषां मध्यमकाष्ठानां चोपरि आच्छादनाय स्थानिकाष्ठानि भेयानि दिक्षु प्यस्त त्रैतोरमध्ये
एककल्पितत्रयनवांगुलादिकहस्तप्रमाणमुभयतो गच्छीत्वाः षडंगुलादिकद्विहस्तविस्ताराणि देहल्स्तु द्वौ द्वौ ड्वाव
द्वारशाखोपेतानि प्राच्यादिग्गतानि चत्वारि द्वाराणि कृत्वा तदूर्ध्वे परितः उपरिस्तात्कटे मंडपस्याच्छादनाय तद्बहिर्हि
स्तमात्रभूमौ प्राच्यादिक्रमेण प्रतिदिशं चत्वारि तोरणानि क्षीरवृक्षमयानि कुर्यात् यथा पूर्वमश्वत्थमयं दक्षिणे
नोदुंबरमयं पश्चिमतः प्लक्षमयं उत्तरेण वटमयं च तोरणस्तंभास्तु सप्तहस्ताः ऊर्ध्वा भवंति दशांगुलविस्तृताः
स्तनउपरिस्तंभार्द्धमानानि तिर्यक्काष्ठानि सप्तांगुलपरिणाहानि शारदातिलके तोरणोपरि तिर्यक्काष्ठेषु
तिलकानि निवेशयेत् तोरणमजानीमकाष्ठमयानि तानि चारंति प्रमाणेति निम्नागमविदः त्रिविक्रमेणानःसम
हस्ताच्छितत्तोरणपते चतुरंगुलादिकहस्तसंमितानि चतुरंगुलविस्ताराणीन्युक्तं तानि चैवेसर्वीकर्मणिशं
खचक्रगदापद्मैर्लांछितानि शैवेतु त्रिशूलांकितानि शैवेनारकर्मस्वेवेसर्वान्मेवेति समाचारः ततो मंडप
मध्ये षडंगुलादिकपंचहस्तायामस्तंभीपचतुर्थपंचमैकादशांशानामन्यतमेनोच्चा दृढोपरिभूमिका
मध्यवेदिकार्या एकहस्तेनाष्ठितेतिलघमाघवः वेदिभित्तिनाह्वियो दशांगुलं कंठमेखलात्रयपरिपदे

दे॰ प्र॰
२

शं विहाय हस्तमात्रस्थाने चतुरस्रं हस्तमात्रं पश्चिमतश्चाचार्यकुण्डमेकं कुर्य्यात् त्रिविक्रमेण तु षोडशहस्तमण्डपपदे
त्रिंशदंगुलोन्नतं परितस्तम्भेषु तन्त्रमेखलाः त्रयं वा त्रिक्रमेण द्वित्रिचतुर्भिरंगुलैर्विस्तारोच्छ्रितं कार्य्यं तथा द्वाद
शांगुलायामः षडंगुलविस्तारः सप्तांगुलविस्तारो वा ग्रामयाममध्ये सबिलाग्रघटस्य पद्माकारा गजोष्ठाकारा वा कुण्डम
ध्ये अधिशालाष्टांगुलमात्रा त्र्यंगुलोच्छ्रपरिधिवेष्टिता कूर्मपृष्ठोन्नतमध्या परिमेखलोपरि योनिः कार्य्या तस्याश्च भूमे
रम्बुजदलपर्य्यन्ते सच्छिद्रं नालं कार्य्यं कुण्डखननं चाथमेखलोवतना मध्ये पृथिवी वा कुण्डविस्तारतत्त्वपरिधेयं खा
तं कुण्डचतुर्विंशांशमितं कण्ठं विहाय मेखलाकार्य्या कुण्डमध्ये च कुण्डं द्वादशांशोच्च कुण्डषष्ठांशविस्तृतः पद्मा
कारो नाभिर्विधेयः कुण्डकरणाशक्तौ हस्तमात्रे स्थण्डिले कुर्य्यात् वेद्याः ईशानभागे हस्तमात्रविस्ताराद्द्वादशांगुलो
च्चा वप्रद्वयान्विता सचित्रानाष्टदलकमलशोभिता ग्रहवेदिः कार्य्या मध्यवेद्या नैरृत्यभागे चतुरश्रषष्टिपदोन्नतमा
न हस्तमात्रे चतुरंगुलोच्छ्रिते समे चतुरस्रं वास्तुमण्डलं कुर्य्यात् महामण्डपस्यान्तरेण चतुरस्रं स्नानतोरणचतुष्कोणे
ध्वजस्तम्भविनानान्वितं कदलीस्तम्भयुतं चतुर्द्वारं पूर्वमथवा मण्डपस्य ? ...वास्तपनमण्डपं कुर्य्यात् तत्र वेदिकात्रयं
महावेद्यर्द्धविस्तीर्णं तदर्द्धायामं मध्ये विदध्यात् स्नपनमण्डपस्य पूर्वे जलाशयवाकमं कुण्डीं विधेया एवं कुण्डमण्ड
पादि विधाय प्रतिष्ठायागोपकरणानि सम्भृतिं विदध्यात् यथा उडुम्बरखदिरवेतसीरक्तश्रीपर्णीदारुजं वा पञ्चाश
त्पद्मशास्त्रिंशदंगुलविस्तारं तदर्द्धेन तत्रमायतं षोडशांगुलोच्छ्रायं पञ्चमस्त्रसिकालेहन्ते पलश्चादेध्येष्टादि त्रिवि
धं भद्रपीठद्वयं द्वादशांगुलविस्तीर्णं दिशि पञ्चहस्तायतनाः कनिष्ठादित्रिविधा वा कुम्भात्रावा ताम्र इन्द्रादिध्वजाति
भारसंख्या हस्तवाहरिता पीता शुक्ला श्वेता मेचकवर्णा रक्ता गौरा पताका दश १० यज्ञोपवीतमथवा दशध्वजापं २
चहस्तदीर्घा । तद्धस्तविस्तृतास्तावितस्य वेणवा यवहस्ता ध्रुवाचतुर्दशहस्तादेशा वज्रमौक्तिकवैडूर्य्यशोवस्फ

दिकपुष्परागेन्द्रनीलमहानीला इति रत्नाष्टकं ॥८॥ हरितालमनःशिलासुककुष्ठस्रोतोञ्जनगंधकसीसकहेममाक्षिक
गैरिकाइति धात्वष्टकं ॥८॥ गोधूमयवतिलमुद्गनीवारश्यामाकसर्षपव्रीहय इति बीजाष्टकं ॥८॥ चंदनरक्तचंदनागुरु
कर्पूरोशीरवेलसर्वौसहदेवीलताणाइत्योषध्यष्टकं ॥८॥ सुवर्णरजतताम्रकांस्यरत्नकूटरागत्रपुसीसनीलमिति लो
हाष्टकं ॥८॥ कांचनपद्मरागपारदसौवर्णपद्ममलविद्रुम मितिन्यासद्रव्याणि मधुपर्कपात्रे सौवर्णे ताम्रमये
वापि चाशत्पंचविंशति विंशतिपलेवा अर्घ्यपात्रे त्रिविधे एकमाष द्विमाष त्रिमाष सुवर्णाजायशलाका ये
चरत्नकदेकद्वये स्थापनीयकलशत्वानि द्वारकलशाश्चाष्टौ दिक्पालकलशादश वेदिकलशाश्चत्वारः वास्तु
मंडलकलशः ॐकलशः संपातकलशः निद्राकलशः स्नपनकलशाः अर्जसिंहान्याति द्वारकलश
शरावाणि धारासहस्रान्विते कलशे भूली चरुस्थाली पिधाने होमार्थं प्रणीतापात्रस्रुकस्रुवप्रोक्षणीपात्राणि
वलिकास्थापनपात्रे उदकाहरणकुम्भाः करकाश्च गजाश्वस्थानवल्मीकहृदवराहोन्नतामाश्रमगारगोष्ठस्थानेभ्यो
मृत्तिकाष्टकं ॥८॥ उदवरन्यग्रोधाश्वत्थन्यजंबूप्लक्षतनकंमवेकाषायपंच कं समीपलाशसहितेवा हरिद्रासर्षप
प्रियंगुकालांजनपद्मकेसरगोरोचनानागकेसरसहदेवीसिंहीव्याघ्रीवलाविवलाशंखपुष्पीवचासुवर्चलाबुद्धि
वृद्धि शतावरीसूर्यावर्त्तीः अपराजिताविष्णुक्रांता इत्योषधिगणः मुरमांसीवचाकुष्ठचंदनमुस्ताजातीफलैला
लवंगसर्षपकुंकुमानि सर्वौषध्य शैलेयवचामांसीरजनीद्वयकुष्ठचंदनजातीफलमुरामुस्ताकंकोलधूपस
हितमहर्तिने गोधूमामलकयवयवमसूरचूर्णानि रुद्रतणं पंचगव्यपंचामृते धृयक्षात्रस्थिते शालिमुद्गगोधूम
तिलकंगुयवश्यामाकासमयान्यानि गोमयंगोमूत्रंगोशृंगोदकनीलोदकेनीराजनाय पिष्टमयपंचस्वस्तिक
शरावाब्जदीपाश्च तीरवृत्तकाष्ठशय्या तूलिकासपरिच्छदा उपधानद्वये सूत्रवस्त्रं चामरं विचित्रवितानं स्थाप

दे॰ प्र॰ नीयकलशवस्त्राणि । चयोदुकूलपटाः कायासाश्चेद्विचित्राः अतिकत्देयानिवस्त्राणि शिल्पिवस्त्रयुग्मं अतित्तिनोमुद्रिका
३ भरणानि आचार्यादिपूजनाय मधुपर्कसामग्रीः नवग्रहमखसंभारः अर्कादिसमिधोप्रत्येकमष्टशतं संदीपपदे
आज्यचर्वादि लोकपालादियागाय पलाशोदुंबरप्लक्षवटापामार्गाश्वत्थसमिधोप्रत्येकमष्टसहस्रमष्टशतंवाशां
तिकपौष्टिकमंत्रदेवतायागायपलाशोदुंबराश्वत्थापामार्गशमीसमिधोप्रत्येकद्वादशसहस्राणि षट्सहस्राणित्री
3 णिसहस्रमष्टशतंवा तिलयवशालिधान्यतंडुलफलादिहोमार्थं देवालंकारणार्थं मुक्तानिर्ग्रथितानिचषुषाणि
ऊर्णमकर्पूरकस्तूरीकुंकुमचंदनं गुग्गुलधूपदहनं आरार्तिकं घंटापादुकादर्पणं अंजनपात्रसिंदूरपात्र भोजनपात्र
जलपात्राणि आसनानि ब्रह्माचार्याद्युपवेशनाय बलिसामग्री पायसभक्ष्यभोज्यनैवेद्यं त्रिसूत्री श्वेतोर्णासूत्र।
निर्मितं कौतुकं दूर्वायवोपवाङ्कशाश्चैववालकचूतपल्लवा हरिद्राद्वयद्वार्थशिवपत्रोशाम्बच. इतिकौतुकाद्याः
केकलोशयपञ्च पहवेद्या ईशानेवरुणस्थापनाय कलशास्ताम्रमयोयथाकलशं घंटावामरस्तुरपिच्छयतोवि
चित्रवर्णोद्द्वच्छिन्नदंडोध्वजः ग्रहादिस्थापनार्थंदय्यत्रताः गृहोपस्करजातंशय्यादानायकदलीस्तंभाः मंडलरचना
यश्वेतरक्तपीतनीलकृष्णवर्णकाः स्नपनकलशपल्लवाः मंडलमत्स्यादिनिर्माणार्थलोहप्रकारः इत्यादिसंपादित
संभारो यजमानोमूर्तिप्रतिष्ठादिनाप्राक्सप्तमदिने पंचमदिनेत्रिदिनेद्विदिनेसद्योवाशिल्पिस्थानात्प्रासाद
प्रादत्तिलेपनदेवंनत्वानीयासनेनिधायारंभेविदध्याच्छुभमुहूर्ते अथसर्वदेवप्रतिष्ठाप्रयोगः प्रकऊडीपते नत्रा २६
दोसपत्नीकोयजमानो गोदानतिलपात्रादिदानरूपप्रायश्चित्तेन मयपापात्मानंपावयेत्। यथा देशकालौसंक
र्त्यॊः मकोहं वाङ्मनःकायोपार्जितपापनिरसन पूर्वकप्रतिष्ठादिकारसिद्धयेप्रकृत्रं त्वंगोदानादिःप्रत्याम्ना ३
यनकरिष्ये इतिसंकल्पः आ अर्वागोगपुरतः संस्थाप्यप्रतिज्ञाय ब्राह्मणंगणादिभिरभ्यर्च्यवाऽलंकरणे

हुत्वा गोदानविधिकल्पप्रकारेण गां संपूज्य सुवर्णं माल्यपात्रे करे कृत्वा गोपुच्छं करेण गृहीत्वा अद्येह सपत्नीकोऽहं कु
हुप्रत्याम्नायभूतो मालेकार्यं सवत्सां रुद्रप्रजापतिदेवत्यां इमां गां अमुकगोत्रायामुकप्रवराय अमुकेदायास्मै
अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे पुच्छं दत्वा यजमानायनभूताये निदानवाक्यं पठित्वा दानप्र
तिष्ठार्थेन सुवर्णं संकल्प दत्वा गामनुव्रजन् गोमन्त्रं जपेद् एवमन्यङ्गोह्यं दद्यात् तथैव तिलपात्रादिदानं वाक्यानुका
यापार्जितपापनिरासद्वारा उत्तरक्रियाधिकारसिद्धये उत्तरविधादिभिः कारयेत् ततः कृतप्रायश्चित्तः सपत्नीकः
शुकः शुक्लमाल्यानुलेपनः तत्रोपविश्य यजमानः शुभे देहे स्वासने उपविश्य प्रदीपं प्रज्वाल्य देशिकमतेन स्वस्त्ययनपु
माहेण्यागसाधनसंपन्नमवलोकयन् तत्कर्मसमर्थमनलसं भूसंकल्पयित्वा समाहितमनाः बहिः शालायां ग
णेशं पूजयेत् यथा आचम्य अद्येत्यस्याप्य प्राणानायम्य पंचामृतस्नालितां सौवर्णप्रतिमां ताम्रादिपात्रे अग्रे संस्था
प्य अद्येह अमुकोऽहं करिष्यमाणामुकदेवप्रतिष्ठायागकर्मणि निर्विघ्नतया कार्यसिद्धये सुवर्णप्रतिमायां भ
गवतो गणपतेः पूजनं करिष्ये इति संकल्पः पश्चात् तिप्रतिष्ठाप्य पीठपूजादिनीराजनांतं संपूज्य दक्षिणां विधा
य पुनरद्येत्यस्याप्य प्रधानसंकल्पं विधाय यथा तिलकुशयवजलान्यादाय देशकालौ संकीर्त्य अमुकराशिरमु
कशर्मा सपत्नीकोऽहं अस्यां मूर्तौ लिंगे वा देवकलासान्निध्यार्थं नरकनिमग्नस्वकुलाभ्युद्धारणतत्कालामकल्क
शिवादिदेवलोकवासकामः श्रीसर्वफलावाप्त्य सुखकामईश्वरप्रीतिकामो वा अमुकमूर्तौ लिंगेस्य वा प्रतिष्ठा
करिष्ये तत्पूर्वांगत्वेनोत्तरोत्तराभ्युदयावाप्तये ऽत्र पुंजेषु फलकलिंगविन्नप्रतिमास्य वा गणपतिसहितगौर्यादि
षोडशमातृणां पूजनमहं करिष्ये इति संकल्प प्रतिष्ठायागनिमित्तं श्राद्धमेतत्कुंडलभे यजमानो यात्मनः शा
कं करिष्ये मातृपूर्वकमिति पठित्वा प्रतिष्ठावास्तु सनायकप्रचारैः संपूज्य तदुपरि दकं स्थाप्य पंचसप्तवासयुत

समनुष्येषुकृणुतेदीर्घमायुः

दे॰ प्र॰ हृतपातः पातयित्वा तीरास्य पूजां गन्धदक्षिणादिना आयुष्यमन्त्रं विदध्यात्‌ यथा ॐ आयुष्यं ब्रह्मवर्चस्यं रायस्पोषमौ
द्भिदं इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम्‌ १ न तद्रक्षा॰ ८॰ सि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येत
५ न्‌ यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः २ यदाबध्नं दाक्षायणा हिरण्यं शतानीकाय सु
मनस्यमानाः तन्म आबध्नामि शतशारदायायुष्मान्‌ जरदष्टिर्यथासम्‌ ३ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी
शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः
सा मा शान्तिरेधि स्वाहा शान्तिः ४ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽपरीतास उद्भिदः देवा नो यथा सदमि
द्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ५ इति जपं विधाय नान्दीश्राद्धं विधाय पुण्याहवाचनं विधाय
आचार्यं वृणुयात्‌ यथा अद्येह शिवादिदेवशक्ति प्रासादप्रतिष्ठाकर्मणि आचार्यकर्मकर्त्रे आचार्याय पूजनेन व
रणं च करिष्ये इति संकल्प्य सुशीलं वेदवेदाङ्गपारगं जितेन्द्रियं ब्राह्मणमर्घ्यादिभिः संपूज्य पक्वविंदयद्रव्याहिर
ण्यमूल्यवस्त्रालंकरणादिगन्धहीना पाभिर्गेयादितनपुष्पधूपीकलासमन्तात्‌ ब्रह्मवाससालंकरणमालाभिरस्मिन्प्रति
ष्ठायागकर्मण्याचार्यकर्मकर्तुमाचार्यत्वेन त्वामहं वृणे इति वरणसामग्रीमाचार्याय दद्यात्‌ वृतोऽस्मीति प्रतिव
चनमाचार्यस्य ततो यजमान आचार्यं प्रार्थयेत्‌ मन्त्रमूर्तिर्भवानाद्य संसारोच्छेदकारकः देवपूजार्हो यथास्या
न्तथा कर्माकृतिं चरेत्‌ः प्रतिष्ठाविधानास्मिन्नककर्मयथोदिते यथाशास्त्रं सर्वाङ्गीणाद्याचार्यः सर्वकर्मसु यथा
यथावन्माचार्यो वृतोऽस्मिन्यत्र कर्मणि त्वत्प्रसादाच्च धर्मस्य समग्रफलमाप्नुयां संसारभयभीतेन यं ययत्तः सम
र्जितः प्रारब्धस्तत्प्रसादेन निर्विघ्नं मे भवत्विह इति प्रार्थ्य अद्येह शिवादिदेवशक्तिप्रतिष्ठाकर्मणि ब्रह्मकर्मक ५
र्त्रे द्वारपालजापकानां उपद्रष्टृपूजनेन वरणं च करिष्ये इति संकल्प्य गन्धादिना ब्राह्मणं संपूज्य पाभिर्गेयादिने

युक्ताः अस्मिन्प्रतिष्ठायागकर्मणि कृत्वा कृतार्वतरणाय ब्रह्मत्वेन त्वामहं वृणे इति कृत्वा इति वचनं संवरंति पठित्वा ततोऽथ
रुधिनामानामात्वं प्रसन्नस्त्वं परायणः तत्प्रसादाद्देवर्षे सर्वं यान्तेमनोगतं प्राप्नुहि मे तत्प्रार्थयेत् कुरुपत्नसमन्वितः ऋ
त्विग्भिः सर्वतः शुक्लैः संयतैः सुसमाहितैः आचार्येण च संयुक्तः कुरु कर्म यथोदितमिति संप्रार्थ्य पूर्वादिदिग्द्वारजाप
कान्वृणुयात् यथा भूमिदेवाग्रे गन्धपुष्पाद्यैः गन्धादिभिः संपूज्य वस्त्रालंकारादिकं हस्ते गृहीत्वा यभिर्गंधादिभिस्त्याप्र
ऋक्पूर्वद्वारे शांतिपाठार्थं द्वारपालत्वेन त्वामहं वृणे इति वचनात् सामश्रीद्यात् वृतोऽस्मीति प्रतिवचने ततः प्रार्थये
यजमानः ऋग्वेद पद्मपत्राक्षो गायत्रीसामदेवतः अत्रिगोत्रस्त्वं विप्रेंद्र शांतिपाठं समाचर इत्यन्यं विप्रं पूर्वद्वारे जाप
कत्वेन वृणुयात् प्रार्थने पूर्ववत् ततो मंडपदक्षिणदिग्द्वारपालत्वेन शांतिपाठार्थमेकं ब्राह्मणं परं जापकत्वेन
वृणुयात् प्रार्थयेत् कात्यायनो यजुर्वेद स्त्रिष्टुभा विष्णुदैवत वैशंपायन विप्रेंद्र शांतिपाठं समाचर इति ततः
सामवेदिनो द्वौ ब्राह्मणौ गंधादिभिः संपूज्य मंडपपश्चिमद्वारे द्वारपालत्वेनाऽपरं जापकत्वेन शांतिपाठार्थं वृ
त्वा प्रार्थयेत् सामवेदस्तु पिंगाक्षो जागतः शक्रदैवतः भारद्वाजस्त्वं विप्रेंद्र शांतिपाठं समाचर इति ततो द्वावथ
र्ववेदिनो विप्रौ गंधादिभिः संपूज्य मंडपोत्तरद्वारे द्वारपालत्वेनाऽपरं जापकत्वेन शांतिकाध्यायपाठार्थं वृत्वा प्रा
र्थयेत् बृहन्नेत्रोऽथर्ववेदो ह्यनुष्टुभो रुद्रदैवतः सुमंतस्त्वापि विप्रेंद्र शांतिपाठं समाचर इति प्रार्थ्य ततो विप्रपरेषि
ते संपूज्योपद्रष्टृत्वेन वृत्वा सदस्यत्वेनान्यानपि कुलीनान् विविधितान् शिष्टान् द्विजान् पूजनपूर्वकं वृणुयात् ततः स
र्वान् ब्राह्मणान् प्रार्थयेत् अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया सुप्रसन्नैः प्रकर्त्तव्यं मेने कर्म यथोदितं अस्मि
न्कर्मणि ये पूज्यन्ते तु नानुरूप्या वा मया सावधानाः प्रकुर्वंतु तेषु संकर्म यथोदितमिति ततो वरणक्रमेणा मधुपर्केणा
चार्यादीनां सर्वेषां ततो चार्यब्रह्मणो रावणप्यके साधिसं भवे येषामपि यथाशाखोपाध्यायेनाचार्यब्राह्मणोन

दे॰ प्र॰ ब्राह्मणोक्तप्रकारेण तयोः पूजनं कृत्वा यथोक्तं तन्न हेदोक्तं तद्यथा कर्ता स्वाचान्तः कुशोपग्रहपाणिः पीठे उपविश्य
५ अस्मिन्कोऽस्य स्विन्नतिष्ठायागकर्मणि वृतानामाचार्यादीनां तत्तद्ब्राह्मणोक्तप्रकारेण मधुपर्केणार्चनं करिष्ये इ-
5 ति संकल्प ॐ साधु भवानास्तां मर्चयिष्यामो भवन्तमित्याचार्यमभिमंत्र्य तस्य यजुःशाखीनेव दृष्यमाणप्रकारेणार्च-
येत् यथा पंचविंशतिकुशपिंजूलिनिर्मितं विष्टरं गृहीत्वा । ॐ विष्टरो ३ विष्टरः प्रतिगृह्यतामित्याचार्याय निवेदयेत्
अर्च्यः प्रतिगृह्य वर्ष्मोऽस्मीत्याथर्वण ऋषिरनुष्टुप्छन्दो विष्टरो देवता उपवेशने विनियोगः ॐ वर्ष्मोऽस्मि
समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदासति इति मंत्रेणोदगग्रं विष्टरमासनेति धायेत
त्रोपविशति ततः पाद्यं ३ प्रतिगृह्यतामिति पादार्थमुदकमर्च्याय निवेदयति अर्च्यः पाद्यं प्रतिगृह्णामीति प्रतिगृ-
ह्य तन्त्रात्रेमं मीलि चार्यो जलिना जलमादाय दक्षिणपादं प्रक्षालयति विराजो दोहोऽसीति प्रजापतिर्ऋषिर्जुछं-
दः आपो देवता दक्षिणपादप्रक्षालने विनियोगः ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो
दोहः इति प्रक्षाल्य पुनस्तेनैव मंत्रेण वामं पादं प्रक्षालयति ततो ऽर्घ्यो ऽर्घ्यः प्रतिगृह्यतामित्यर्घ्यपात्रं वर्तमानमे-
व गृहीत्वाने ऽर्घ्यं यजमानः प्रयच्छति आपः स्थ इति प्रजापतिर्ऋषिर्यजुश्छंदः आपो देवता अर्घ्यग्रहणे विनियो-
गः ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति निःपठित्वा प्रतिगृह्णामीत्यर्च्यः प्रतिगृह्य मूर्द्धपर्यन्तमानीय समु-
द्रो वा हुय त्वमभिमंत्रयते समुद्रं व इत्याथर्वण ऋषिरनुष्टुप्छंदः आपो देवता अर्घ्याभिमंत्रणे विनियोगः ॐ
समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मा परासेचि मत्पयः इति अर्घ्यं चर्चयित्वा आचमनी-
यं ३ प्रतिगृह्यतामित्याचमनपात्रं सोदकमर्च्याय प्रयच्छति अर्च्यः प्रतिगृह्णामीति प्रतिगृह्य आमागं- ५
न्निति परमेष्ठी ऋषिर्बृहतीछंदः आपो देवता आचमने विनियोगः ॐ आमागन्यशसा सꣳसृज वर्चसा तमाकुरु

श्रियेप्रजानामधिपतिं पशूनामविहेनन्नामीति सकृदाव सव्यपाणौ च मनेऽर्पयेत् मधुपर्को मधुपर्कः प्रतिगृह्य
नामितिस्थापितं दधिमधुघृतं कांस्यपात्रे कांस्येन पिहितमर्घ्याय निवेदयति सच यजमानहस्तस्थितं मधुपादिकं मधु
पर्कं विलोकयेत् मित्रस्यत्वेति बृहस्पतिऋषिर्यजुश्छंदः मधुपर्को देवता मधुपर्कावेक्षणे विनियोगः
ॐ मित्रस्यत्वा चक्षुषा समीक्षे इति प्रतीक्ष्य प्रतिगृह्णाति ॐ देवस्यत्वेति बृहस्पतिरांगिरस ऋषिर्यजुश्छंदः सविता देव
ता मधुपर्कग्रहणे विनियोगः ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति प्रतिगृ
ह्य सव्ये पाणौ निधाय दक्षिणहस्तस्यानामिकया त्रिर्मिश्रयति नमः श्यावेति प्रजापतिऋषिर्यजुश्छंदः सविता
देवता मधुपर्कालोडने विनियोगः ॐ नमः श्यावास्यायान्नशने यत आविद्धं तत्ते निष्कृन्तामि इति सकृदालोड्य
मध्यमानामिकांगुष्ठाभ्यामादाय बहिर्निक्षिपेत् पुनरेवं द्विवारमालोडने निकृन्तनं च कृत्वा त्रिः प्राश्नाति यन्मधुनइ
ति उत्स ऋषिर्जगती छंदो मधुपर्को देवता मधुपर्कप्राशने विनियोगः ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं
तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीत्यनामिकांगुष्ठाभ्यामादाय त्रिः प्राश्नाति
मधुवाता ऋतायत इत्याद्याभिस्तिसृभिः ऋग्भिर्वा प्रत्यृचं च प्राश्नाति प्राशितशेषं पुत्रायांतेवासिने वोत्तरत आसी
नाय दद्यात् सर्वं वा प्राश्नीयात् पूर्वस्यां दिशि असंचरे प्रदेशे वा निक्षिपेत् ततः स्मार्तविधिनाचम्यांगान्युपस्पृशति
संहिताभिस्तर्जनीमध्यमानामिकाभिः वाङ्म आस्येऽस्त्विति मुखं स्पृशेत् अंगुष्ठप्रदेशिनीभ्यां नसोर्मे प्राणोऽस्त्वि
ति नासिकारंध्रद्वयं अंगुष्ठानामिकाभ्यां अक्ष्णोर्मे चक्षुरस्त्विति चक्षुषी तथैव कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ स
हितांगुल्यग्रैर्बाह्वोर्मे बलमस्त्विति दक्षिणेनैव बाहू अंसहस्तांगुलियाणिभ्यां ऊर्वोर्मे ओजोऽस्त्विति ऊरू युगपद्धस्तेन अ
रिष्टानि मेंऽगानि तनूस्तन्वा मे सह संत्विति शिरः प्रभृतिपादांतानि सर्वांगान्यालभेत उभाभ्यां कराभ्यां एवमाऽ

दे॰ प्र॰ घासोदकाय यजमानो ऽतिकृतिकृष्णादित्स्त्रीत्वा गौर्गौर्गौः सभ्येनानिमितिब्रूयात् अथोंश्च मातारुद्राणामिति
६ ब्रह्मा ऋषिस्त्रिष्टुप्छन्दो गौर्देवता अभिमन्त्रणे विनियोगः ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम-
मृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट नुद्या मुञ्चन्तु उन्नस्जननन्त्पाण्यवि
6 मुक्तैः प्रतिब्रूयात् अथ यस्य हतनस्य मधुपर्केणार्चनं स्यात् हुतपार्थे मिमांदक्षिणाशाहनःण्यदास्य इति
संकल्प्य द्रव्यं विप्राय दद्यात् एवं ब्राह्मणोपि मधुपर्केणार्चनं दक्षिणा द्वारपालनायकयोश्च इति यजुर्वेदिनां म-
धुपर्कविधिः अथ सामगानां मधुपर्कविधिः यथा अर्घ्यस्यान्ते गौर्मे कोवधा आविष्टरदानाद्यजमान-
पुरुषाः प्रतितिष्ठेरन् ततो ऽर्घ्योदकाय तिष्ठन्तं वा अनेन मन्त्रेण गोरूपस्थाने जपेत् अर्हणेति वसिष्ठ ऋषिर्निचृदनु-
ष्टुप्छन्दो धेनुर्देवता गोरूपस्थाने विनियोगः ॐ अर्हणा पुत्रवासमा धेनुरभवद्यमे सा नः पयस्वती दुहा उत्तरा-
मुत्तरां समामिति इदमहमिति वसिष्ठ ऋषिः प्रकृतिश्छन्दो विराड्देवता आसनोपवेशने विनियोगः ॐ
इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि इत्युपवेशयेत् ततो यजमानपुरुषा विष्टरपाद्यार्घ्याचमनीयम-
धुपर्कानादयाहित्रिर्निवेदयेत् यथा विष्टरो प्रतिगृह्यतामिति यजमानः प्रयच्छेत् प्रतिगृह्णामीत्यर्च्यो गृह्णी-
ता एकं तु नरा यामासनायोपयमेत् या ओषधीरिति वसिष्ठ ऋषिरनुष्टुप्छन्दः ओषधयो देवता आसनायपस्ता-
द्विष्टरनिधाने विनियोगः ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः तामसत्वमसि तासामने अच्छिद्राः शर्म-
यच्छत इति ततो द्वितीयविष्टरं पादयोरुपस्तान्निदध्यात् या ओषधीरिति वसिष्ठ ऋषिरनुष्टुप्छन्दः ओषधयो ६
देवता द्वितीयविष्टरस्य पादयोरुपस्तादाने विनियोगः ॐ या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु तासामसि त्वम-
स्मिन्पादयोरच्छिद्राः शर्म यच्छत इति ततः पाद्यं २ प्रतिगृह्यतामिति यजमानः प्रयच्छेत् प्रतिगृह्णामीत्यर्च्यो

गृहीत्वावलोकयेत् यन्तादेवीरिति वसिष्ठऋषिः संकृतिछंदः आपोदेवता पाद्योदकावलोकने विनियोगः
ॐ यन्तो देवीः प्रतिपश्याम्यापस्ततोमाराद्धिराया व्रजत् इत्यवलोक्य अर्घ्यः स्वयमेव पूर्वं वामं पादं प्रक्षालयेत्
सव्यमिति वसिष्ठऋषिः प्राकृतीछंदः श्रीर्देवता वामचरणप्रक्षालने विनियोगः ॐ सव्यं पादमवनेनिजे
स्मिन् राष्ट्रे श्रियं दधे ततो दक्षिणं दक्षिणमिति वसिष्ठऋषिः प्रकृतिछंदः श्रीर्देवता दक्षिणपादप्रक्षालने
विनियोगः ॐ दक्षिणं पादमवनेनिजेस्मिन् राष्ट्रे श्रियमावेशयामिति ततः सहैवोभयपादौ सव्यपूर्वं प्रक्षा
लयेत् पूर्वमन्यमिति वसिष्ठऋषिः विराट्छंदः श्रीर्देवता उभयचरणप्रक्षालने विनियोगः ॐ पूर्वमन्यम
परमन्यमुभौ पादाववनेनिजे राष्ट्रस्यर्द्ध्या अभयस्यावरुद्ध्यै इति ततो यजमानोऽर्घ्यमस्य पादौ स्ववर्णोदकेन प्र
क्षालयेत् ततोऽर्घ्यौ २ अर्घ्यः प्रतिगृह्यतामिति यजमानः प्रयत्नेन अर्घ्यः प्रतिगृह्णामीति गृहीत्वा अन्नस्ये
ति वसिष्ठऋषिर्धृतिछंदः अर्घ्यो देवता अर्घ्यग्रहणे विनियोगः ॐ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासमिति अ
र्घोदकेन शिरसि मार्जनं कृत्वा अर्घ्यं भूमौ स्थापयेत् आचमनीयं २ प्रतिगृह्यतामिति यजमानः प्रयत्नेन
प्रतिगृह्णामीति गृहीत्वा यशोसीति वसिष्ठऋषि यजुश्छंदः आचमनीयं देवता आचमने विनियोगः ॐ य
शोसि यशो मयि धेहि इति मंत्रेण सकृदाचम्य द्विस्तूष्णीं ततः स्नानाचमनं कुर्यात् ॐ मधुपर्को २ प्रतिगृह्यता
मिति यजमानः प्रयत्नेन यशस इति वसिष्ठऋषिः यजुश्छंदः मधुपर्को देवता मधुपर्कग्रहणे विनियोगः ॐ यश
सो यशोसि इति मधुपर्कं गृहीत्वा सव्यहस्ते कृत्वा दक्षिणहस्तेनोद्घाट्यैव त्रिवारं भक्षयेत् यशस इति वसिष्ठऋ
षिः यजुश्छंदः मधुपर्को देवता प्राशने विनियोगः सांगुष्ठकनिष्ठकया ॐ यशसो भक्षोसि महसो भक्षोसि श्री
र्भक्षोसि श्रियं मयि धेहि ततः सांगुष्ठानामिकया पूर्वोक्तमंत्रेण प्राश्नीयात् ततः सांगुष्ठ मध्यमयोक्तेनैव

दे॰ प्र॰ मंत्रेण प्राश्नीयात् ततः सर्वौषधीमिश्रं दधि मधु प्राशयेत् शेषं पुत्राय शिष्याय वा दद्यात् ततः पुनराचम्येत् अथवा
पितृभ्यो ब्रूयात् गौर्गौर्गौरिति मुंच गामिति वसिष्ठ ऋषिर्बृहती छंदो गौर्देवता गोमोक्षणे विनियोगः ॐ मुंच गां वरुण
पाशाद्द्विषंतमभिधेहि तं जह्यमुष्योभयोरुत्सृज गामत्तु तृणानि पिबतूदकमिति पठित्वा गामुत्सृजेत् ततः
उत्सृष्टायां गवि अर्हणीयो गवाभिमुखो जपेत् माता रुद्राणामिति वसिष्ठ ऋषिः त्रिष्टुप् छंदो गौर्देवता गोर
भिमंत्रणे विनियोगः ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय
मा गामनागामदितिं वधिष्टेत्यभिमंत्रयेत् ततो गोर्हस्तद्वयेन हृदयं गृहीत्वा ब्रूयात् मम अमुकशर्मणो ब्रा
ह्मणस्यामुकशर्मणो यजमानस्य पाप्मानं हनेति ततो यजमानः अद्येह कृतस्य मधुपर्केणार्चनस्य
साद्गुण्यार्थं इदं स्वर्णमग्निदैवतं ब्राह्मणाय संप्रददे इति संकल्प्य स्वर्णं दद्यात् इति सामगानां मधुप
र्कविधिः अथाथर्ववेदिनां मधुपर्कविधिः तत्रादौ यजमानो दर्भानानीय विष्टरान् कुर्वीत अर्घ्यं प्रतिनिवेद
न् सचक्षुरेवेनत्वा कर्मणा सन्नह्यामीति मंत्रेणैकं शाखापायाय सत्वेनत्वा कर्मणा सन्नह्यामीति द्वितीयमा
द्वितीयमासनार्थं तपसात्वा कर्मणा सन्नह्यामीति तृतीयं मधुपर्कार्थमिति वसिष्ठरत्रयं तिर्मोयं यजमान
हस्ते दद्यात् अनेन मंत्रेण ॐ प्रतिसृष्टो द्वेषायास्मान्द्वेष्टि यं च वयं द्विष्मोऽस्य च दातेति अत्रास्य दातेति
ति पठन् यजमानमुखमीक्षेत अथ यजमानः पादार्थमुदकं गृहीत्वा अर्घ्यप्रतिपाद्यं भो इति निवेदयेत् अ
र्घ्यप्रतिग्रहीता वक्ष्यमाणमंत्रचतुष्टयेन तदभिमंत्रयेत् ॐ हिरण्यवर्णाः शुचयः पावका यासु जाताः सविता यास्व
ग्निः या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना भवंतु १ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्य
ञ्जनानाम् या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना भवंतु २ यासां देवा दिवि कृण्वंति भक्षं या अंतरि

देवहूया भवंति या अग्निं गर्भं दधिरे सुवर्णास्ता नः आपः शं स्योना भवंतु २ शिवेन मा चक्षुषा पश्यतापः शिवया त
न्वोपस्पृशत त्वचं मे घृतश्चुतः शुचयो याः पावकास्ता नः आपः शं स्योनाः भवंतु ४ इति तिसृभिः ॐ मयि ब्रह्मवर्चसं पा
द्यारण्याणीति मंत्रेण पाद्योदकैकदेशेन दक्षिणं पादं प्रक्षाल्य ॐ मयि तत्तेषु विराज्ञ्यपीरयाणीति मंत्रेण वामं पादं
प्रक्षाल्य ॐ इमौ पादाववनिक्तौ ब्राह्मणो यशसा सात्मनाम् आपः पादावनेजनी द्विषंतं निर्दहंतु मे इत्यादावक्षु
मेत्य अस्य चंदनविनिया न्वानारभमीत्यनेन ततो यजमानः सविष्टरासने भोऽन्यच्चीयासनमाहारयति अर्घ्य
स्य ॐ विश्ववरी पृथिवी मा वमावदामिततमां भूमिं ब्रह्मणा वा वर्धाना ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतेनाभि निषीद
म भूमिरिति मंत्रेण सदक्षिणाविष्टरासने प्रत्यङ्मुख उपविशेत् ततष्ठकशाविष्टरे पादौ प्रतिष्ठापयेत् ॐ अ
धिष्ठितो हे वायोः समानेष्वधिष्ठित एवं यज्ञिष्यो स्यचंदनविनिमंत्रेण अत्रास्य चंदनविनिमंत्रेण अत्रास्य चंदनवि
ति मंत्रेणार्घेन दानारभमीत्यनेन ततो यजमानो अर्घ्यपात्रस्थं गंधपुष्पादिसहितेनोदकेन गृहीत्वा अर्घ्यं भूरन्त्र्येमावेदयेत्
इत्यर्घः समानानामुत्तममस्मि मन्वमहंमहदुष्टः समानानां भूयासं आपोमम्नेस्यामन्ने माकृणवदानाः साकं वर्चो भवंतु
अस्यावद्ग्रीवन्पयस्ने पुष्टोभूर्भुवः स्वर्जनं ददामिति मंत्रेणार्घ्यं गृहीत्वा अभिमंत्र्य आत्माभिमंत्रयेन्त सीनिनीय ॐ नेत्रो
स्पन्तमसीतिलके ललाटमालभेत् अथ कर्णाचमनीयमुदकेन गृहीत्वा आचमनीयं भूरन्याचमनीयं तिवेदयेत्
अर्घ्यमानहृहीत्वा ॐ जीवास्य जीवासं सर्वमायुर्जीव्यासमृतजीवास्योपजीव्यासं सर्वमायुर्जीव्यासं स्थमंजीवस्य संजी स४५
व्यासं सर्वमायुर्जीव्यासं जीवनास्य जीव्यासं सर्वमायुर्जीव्यासमिदं जीवस्त्य जीवदेवा जीवाजीव्यासमहं सर्वमा
युर्जीव्यासमिति मंत्रेण त्रिवारपठितेन त्रिराचमेत् ततो यजमानो मधुपर्कपात्रं कांस्यं दधिमधुघृतपूर्णं
कांस्यपात्रेणापिहितमुपस्थितविष्टराविशस्य तैकशाविष्टरमादायवितु चेरामधुपर्कौ इति मधुपर्को

दे॰प्र॰ मोऽइतिनिवेदयेत् अर्घ्यमस्ययजमानहस्ताभ्यांद्विपात्रीस्थितमेवततमनुमंत्रयेदभिर्मंत्रैः ॐमफवाताऋतायतेमफ
८ क्षरंतिसिन्धवः माध्वीर्गावोभवंतुनः १ मफनक्तमुतोषसो मफमत्पार्थिवंरजः माध्वीर्नःसन्त्वोषधी २ मफमा
8 न्नोवनस्पतिर्मफमां अस्तुसूर्यः मफद्यौरस्तुनापिता ३ इतिपुनरभिमंत्र्याभिमंत्रयेत् ततःतन्मूर्ध्न्यात्वा वृत्तषाय
नीत्ते इतीमफपर्कमपनीय ॐअयमोऽहमयतोमेऽस्यात्मा पुनमेवस्तुरस्तुनमेऽस्याश्रोत्रंमधुनोमेप्राणापानोमेपानो
यतोमेव्यानोवपुनोमेऽहंसर्वः ॐदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रसृतंप्राशिष्वाप्रति
गृह्णामीतिहस्ताभ्यांप्रतिगृह्य प्राग्देशेस्थंडिलेनिधाय ॐपृथिव्यास्त्वानाभौसादयाम्यदित्याउपस्थइति
मंत्रेण भूमौप्रतिष्ठाप्यांगुल्यद्वयेनप्रदक्षिणंप्रचाल्यानामिकांगुष्ठेनच संगृह्यवक्ष्यमाणमंत्रैः प्राश्नीयात्
ॐभूःतत्सवितुर्वरेण्यंभूःस्वाहेतिप्रथमं ॐभुवःभर्गोदेवस्यधीमहि भुवःस्वाहेतिद्वितीयं ॐस्वःधियो
योनःप्रचोदयात् स्वःस्वाहेतितृतीयं ॐवर्यंदेवस्यस्यधीमहि तत्स्वाहेतिचतुर्थं ॐउदेदेवस्यभाजनहृद
स्वाहेतिपंचमं कस्वाहेतिषष्ठं ॐउरुत्स्वाहेतिसप्तमं ॐमहत्स्वाहेतिअष्टमं ॐत पाद्वारेप्राघपाचम्याफिर्दे
द्विजायवृषभायवादद्यात् ततःकर्तागोगौगौइतिनिवेदयेत् अथार्च्य ॐभूतमसिभवदस्यमेप्राणावद्भभेव
ज्येष्ठयज्ञामनतामनः ॐभूःभुर्वःस्वर्जंतदोमित्युत्सृजति ॐमानाद्दित्यानाऽदुहितावसूनांप्राणःप्रजानाम
मृतस्यनाभिःहिरण्यवर्णामर्चे कथाकृतानाचीमहान् भर्गोस्वरतिगर्भेषु ॐस्तर्यवसाऽद्भगवतीहि भूयाअथा २०६
वयंभवन्त्याम अद्धिन्तृणमघ्न्येविश्वदानीपिबशुद्धमुदकमाचरंती इतिप्रतिष्ठमानामनुमंत्र्य अस्ययजमान
स्यममचपाप्माहतइतिब्रूयात् ततोदक्षिणा इत्यथर्ववेदीनांमफपर्कविधिः ततोद्वारपालानपिमफपर्के ८
णार्चयेत् पूर्वद्वारपालऋग्वेदिनो दक्षिणेयजुर्वेदिनो पश्चिमेसामवेदिनो उत्तरेऽथर्ववेदिनो तत

वावोऽन्यप्रकारेण मधुपर्केणार्चयेत् यद्वक्ष्यते ति समभवे सदस्यानपि तत्रावोऽन्यप्रकारेण मधुपर्केणपूज
येत् अथ ऋत्विगादीनां मधुपर्कविधिः यथाविष्टरपाद्यमुदकमर्घ्यमाचमनीयमुदकं मधुपर्कं कांस्यपात्र
स्थं दधिमधुघृतं कांस्येनापिहितं गां च पुरुषैः प्रतिकल्प्य यजमानः प्राङ्मुखोपविष्टायर्त्विजे विष्ट
रो २ प्रतिगृह्यतामिति निवेदयेत् ॐ अर्च्यः प्र ॐ अहं वर्ष्म सजातानां विद्युतामिव सूर्यः इदं तमधिति
ष्ठामि यो मा कश्चाभिदासतीत्यनेन मंत्रेणोदगग्रमथोत्तरयोरुपविशति पादाभ्यामाक्रमेश वा ततः पाद्यं ३
प्रतिगृह्यतामिति यजमानो पाद्यं निवेदयेत् स च पाद्योदकमादाय दक्षिणपादं प्रथमं प्रक्षाल्य ततः अर्घ्यो ३ प्रति
गृह्यतामिति यजमानोऽर्घ्यं निवेदयेत् सचाञ्जलिना प्रतिगृह्य मूर्द्धपर्यन्तं तं नीय भूमौ तूष्णीं अथाचयित्वा
३ आचमनीयं प्रतिगृह्यतामिति आचमनीयं निवेदयेत् आचम्य अमृतोपस्तरणमसीति सकृदाचमीत्
ततः शुद्ध्यर्थं तूष्णीं त्रिवयः प्राग्वाद्विराचमीत् ततश्चाचान्ताय मधुपर्को ३ प्रतिगृह्यतामिति मधुपर्कं नि
वेदयेत् अथ चाह्रियमाणो माह्रियमाणं यजमानहस्तस्थितं मधुपर्कं ॐ मित्रस्य त्वा चक्षुषा प्रतीक्ष इत्यवलो
कय ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति यजमान दत्तमञ्जलिना
प्रतिगृह्य सव्यपाणौ कृत्वा ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः १ मधुन
क्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता २ मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः मा
ध्वीर्गावो भवन्तु नः ३ इति ऋग्भिः त्रिः प्रदक्षिणमालोड्य ॐ वसवस्त्वा गायत्रेण छन्दसा भक्षयन्त्विति तदेकदे
शं मधुपर्कपात्रस्य प्राग्भागे भूमौ निक्षिपेत् ॐ रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्त्विति दक्षिणभागे निक्षिपेत्
ॐ आदित्यास्त्वा जागतेन छन्दसा भक्षयन्त्विति पश्चात् ॐ विश्वेदेवास्त्वानुष्टुभेन छन्दसा भक्षयन्त्विति उत्त

दे॰ प्र॰ रत्नानि क्षिपेत् ततो मध्वाज्यं गृहीत्वा ॐ भूतेभ्यस्त्वेति त्रिरूर्ध्वं मुखे क्षिपेत् ततः ॐ विराजो दोहोऽसीति प्रथमं प्राशयाचम्य ॐ विरा
जो दोहमशीयेति द्वितीयं प्राशयाचम्य ॐ मयि दोहः पद्यायै विराजो दोह इति तृतीयं प्राशयाचम्य तूष्णीं चतुर्थं प्राश्नीया
५ त् तथैवैतत्सर्वं भिक्षुर्दद्यात् शेषमुदगोभेत्राय ब्राह्मणायोच्छिष्टाधिकारिणे प्रयच्छेत् अप्सु वा प्रक्षिपेत् सर्वं वा सर्वं
प्राश्नीयात् सद्यश्च उदाचम्य पुनराचमनीयेनाचमेत् ॐ अमृतापिधानमसीति प्रथमं ॐ सत्यं यशः श्रीर्म
यि श्रीः श्रयतामिति द्वितीयमाचमनं विदध्यात् ततो यजमान आचार्यो नोदकायाचार्याय गौर्गौरिति गां निवेद
येत् सवत्सं गृहीत्वा ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मागा
मनागामदितिं वधिष्टेति जपित्वा पिबत्वुदकं तृणान्यत्त्वित्येतेन इति मधुपर्कविधिः ततो यजमा
नः समस्यान्यापि कलशमाजिघ्रमित्यादिमन्त्रैः कलशविधिना संस्थाप्य तदुपरि पूर्णां दिव्वेति मन्त्रेण धान्य
पूर्णपात्रं न्यस्य तत्र गणपत्यावाहनमतिमदप्रकारेण ब्रह्मवरुणसहितान्यावाह्य संपूज्य पुष्पाञ्जलिं दद्यात् तत
आचार्यो रक्तवस्त्रावेष्टितपूर्वी सर्षपदधिक्षतसुवर्णरत्नगर्भपोटलिकां रक्षाविधिप्रकारेणाभिमन्त्र्य ब्राह्मणादिरवे
जायमाने यज्ञो वा च दधि वक्षेति मन्त्रेण यजमानहस्ते बध्नीयात् ततो यजमानो यथाविधिना कर्मकरुदमितिनानु
यात् तैश्च सर्वैः स्वस्वकर्म करवाम इति प्रतिश्रुतः पुनर्यजमानः संसारभयभीतेन त्वयं यच्चः सुभक्तितः प्रारब्ध
त्वत्प्रसादेन निर्विघ्नं मे भवत्विति आचार्यो ब्राह्मणा वा राष्ट्रबलं ग्रन्थिविधायाथ ब्राह्मणादिरवे जायमाने सपरिच्छदो लाजा
नवकीर्णकलशपुरःसरः आचार्यप्रमुखमहामण्डपं प्रदक्षिणीकृत्य ते प्रविशेत् ॐ भद्रं कर्णेभिः शृणुयाम देवाः
भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः इति मन्त्रेण तत्र यजमाना ५
चार्यर्त्विजां पश्चिमद्वारेण प्रवेशः यजमानपत्न्याः दक्षिणद्वारेण प्रवेशः पूर्वद्वारेण मण्डपमध्ये होमद्रव्यानयनं

दानार्थद्रव्यसहितेन द्वारेणानयनं पूजार्थसंभारार्थसंभाराणां उत्तरद्वारेणानयनं यजमानो मंडपं प्रविश्य महावेद्या
प्रथमद्वारे सपत्नीको भद्रासने उपविशेत् ततः आचार्यः पूर्वसंपादितपंचगव्येन यो हि हेति मंडपं प्रोक्ष्य अपक्रामं
तु भूतानि पिशाचाः सर्वतोदिशं सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् इति मंत्रेण सर्षपविकिरणेन भूतोत्सादनं विधा
य देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्ष इति रक्षां कृत्वा पंचपल्लवाफयेन नवितस्त्याहरणेनापाज
इति मंत्रेण मंडपं संवेष्ट्य ब्राह्मणेभ्यो गंधादिकं प्राहयित्वा मंडपमनुमंत्रयेत् तद्यथा वेदिकाग्नेयकोणे प्रथमं स्थाने
वसुदायै नमः वसुदामावाहयामीत्यालभ्य गंधपुष्पादिनार्चयेत् ततः प्रादक्षिण्येन भद्रायै नमः इति द्वितीया ओं अ
दित्यै नमः इति तृतीया ओं नंदायै नमः इति चतुर्थी आदौ सर्वत्र प्रणवो वाच्यः अथ मंडपाग्नेयकोणे ओं भूम्यै नमः इति
प्रथमो स्तंभो आवाहयामीति सर्वत्रोहः कार्यः ततः प्रदक्षिणक्रमेण सरस्वत्यै नमः इति द्वितीयं पूर्वसंध्यायै
नमः इति तृतीयो मध्यसंध्यायै नमः इति चतुर्थी पश्चिमसंध्यायै नमः इति पंचमी गायत्र्यै नमः इति षष्ठी सावित्र्यै न
मः इति सप्तमी बृहत्यै नमः इत्यष्टमी अदितये नमः इति नवमी विनतायै नमः इति दशमी पौर्णमास्यै नम
इति एकादशी सिनीवाल्यै नमः इति द्वादशी इति षोडशस्तंभानामालभ्य गंधादिना संपूज्य नाममंत्रेण नमः इति
वार्तिकाः नमः इति द्वारशाखावाह्यप्रतानि अभिमंत्र्य संपूज्य पश्चिमद्वारेण निर्गम्य पूर्वादिद्वारेण पूजामारभेत्
इति मंडपानुमंत्रणं ततः पूर्वे आयाहि वज्रसंकाश शर्वद्वाररक्षणाधिप ऋग्वेदाधिपते नाम्ना सुशोभन नमो-
ऽस्तु ते इति द्वारदेवतामावाह्य अश्वत्थतोरणे ओं अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं इत्या
लभ्य प्राचीं दिशं समाश्रित्य सुहृच्छेनामनोवर्णं महावीर्य महाकायमिंद्रप्रभ समप्रभ अस्मिन्महोत्सवे मत्ते
क्रतूणां प्रवरे शुभे पदे हि अश्वत्थतोरणमाल्यवत्पर्वतसहित ऋग्वेदाधिष्ठित इंद्रदेवत्यस्मै यत्नेन रक्ष सर्वविघ्ना

दे॰प्र॰ निवारय ऋग्वेदाधिष्ठितायमहातोरणायनमः इतिगंधादिभिःपूजयेत् अथत्रिशूलशृंगेषुप्रादक्षिण्येनादिन्यायमेत
प्रथमशृंगेरुद्रं द्वितीयेयानारे द्वितीयेभगामित्यादिन्यत्रयंद्वारशाखयोःऋवे अश्वरंचेतिवस्त्रद्वयेनाममंत्रेगंधादि
१ नासंपूज्य शृंगेषुशाखयोर्वस्त्राणिवध्वा शाखामूलयोर्धान्यपुंजोपरिवारिपूर्णौरत्नगर्भौवस्त्रयुगाढ्यौप्रशांत
शिशिरनामानौ नानवीजांकुरशावापिहितमुखौ ॐआजिघ्रकलशमितिप्रतिष्ठाप्य प्रशान्तायनमः शिशि
रायनमः इतिगंधादिनासंपूज्य तोरणोत्सर्कंदनादिना अलंकृत्यमन्त्रराजं बृहस्पतीआवाह्यपूजयित्वा दक्षिणतो
10 रणपूजामारभेत् इतिपूर्वतोरणपूजा अथदक्षिणतोरणपूजा यमसेतुधर्मराजायत्रेतायुगाधिपायच यजुर्वेदा
दिदेवायसुभद्रद्वारदक्षिणे इतिद्वारदेवतामावाह्य ॐउदुम्बरेविकटेनाममंत्रोरणं ॐईषत्वेतिआलभ्य दक्षिण
दिशामाश्रित्यविकटेनाममंत्रोरणं महावीर्यसमायंत्र भिमांजनसमप्रभे यस्मिन्होमंवेयस्तेकृत्तणांप्रवरे
शुभे गृहाणहि उदुम्बरमस्मत्तोरणंगंधमादनपर्वतसहितायजुर्वेदाधिष्ठित यमदेवतायपनेयस्तेरत्नसर्वविघ्नानि
वारय यजुर्वेदाधिष्ठितायोदुम्बरतोरणायनमः इति गंधादिनापूजयेत् शूलशृंगेषादिन्यान् पूस्तेनमः मित्रा
यनमः वरुणायनमः द्वारशाखयोः सोमायनमः आप्यायनमः इतिवस्त्रद्वयेनाममंत्रै गंधादिनासंपूज्य
शृंगेषुशाखयोर्वस्त्राणिवध्वा शाखामूलयोर्धान्यपुंजेषुपरिवारिपूर्णौरत्नगर्भौवस्त्रयुगाढ्यौ पर्जन्याशोक
नामानौ नानवीजांकुरशावापिहितानतौ आजिघ्रकलशमितिप्रतिष्ठाप्य पर्जन्यायनमः अशोकायनमः इ
तिनाममंत्रेण गंधादिनापूजयेत् स्वर्कंदनादिलंकृतेतोरणोत्सूर्यमंगारकेचावाह्यसंपूज्य पश्चिमतोरणपूजा
मारभेत् इतिदक्षिणतोरणपूजा अथपश्चिमतोरणपूजा पश्चिमेपूर्ववत् नमोस्तुकामरूपायपश्चिमद्वारपा १०
लिय सामवेदाधिपत्येवहि नाम्नाकल्याणकारक इतिद्वारदेवतामावाह्य प्लक्षंसभीमंनाममंत्रोरणं ॐअग्नआ

याहिवीनयेप्सगणानांहव्यदानये निहोनामस्निवृहिषीऽन्यालभ्य प्रतीचिंदिशामाश्रित्य स्तम्भेनामतोरणं महावी
र्यंमहाकायंस्तवर्णसदृशप्रभे अस्मिन्यसेपृष्ठेहिमाद्रमहातोरणं विन्ध्यपर्वतसहितं सामवेदाधिष्ठितवरुणदे
वस्थितंयतेरत्तसर्वविघ्नान्निवारय सामवेदाधिष्ठिताय प्रतीचतोरणाय नमः इतिगंधादिभिसंपूज्य त्रिशूलंघ्रेगेधा
दिग्पालं ॐ अर्यमणेनमः ॐ प्रभावेनमः ॐ विवस्वतेनमः द्वारशाखाभ्याः ॐ अनिलायनमः ॐ अनलायनमः
तिवस्तद्वये नाममंत्रेणगंधादिनासंपूज्य ॐ गृहेषुशाखाभ्यांवस्त्राणि वधाशाखामूलयोर्धान्यपुञ्जौपरिवाविघ्नौरत्न
गर्भौविस्तपुगाद्यौ मृतसंजीवनामृतनामानौकलशौजानवीजांकुरशरावपिहितौ आजिघ्रकलशामितिप्रतिष्ठाप्य
मृतसंजीवनायनमः अमृतायनमः इतिनाममंत्रेण गंधादिनापूजयेत् स्तगायलंकृतेनतोरणे उपशुक्रानावाह्य
नामावभेन इतिपश्चिमतोरणपूजा अथउत्तरतोरणपूजा उत्तरेपूर्ववत् नमस्तेदिव्यरूपायअथर्वाधिपतयेप्रभो
कलेरधिपतेनाम्नामंगलेवाननराननं इतिहावेवतामावाह्य उत्तरांदिशमाश्रित्य स्तम्भेनामतोरणं महावीर्यंम
हाकायंशुद्धस्फटिकसन्निभे वाटेतोरणं ॐ शंनोदेवीरभिष्टयेऽआपोभवन्तुपीतयेशंयोरभिस्रवन्तुनऽन्यालभ्य
अस्मिन्कृतोऽसिहि अथर्वाधिष्ठितनेयद्रोप महातोरणंहिमवत्पर्वतसहितंसोमदेवस्यनमस्तेरत्तसर्वविघ्नान्निवा
रय अथर्वाधिष्ठितायउत्तरतोरणायनमः इतिगंधादिभिःसंपूज्य ॐ गृहेषुदिग्पालं त्वष्ट्रेनमः सवित्रेनमः विलवे
नमः द्वारशाखाभ्यां प्रत्यूषायनमः प्रभासायनमः इति वसुद्वये नाममंत्रेणगंधादिनासंपूज्य ॐ गृहेषुशाखाभ्यांवस्त्रा
णिवधा शाखामूलयोर्धान्यपुञ्जौपरिवाविघ्नौरत्नगर्भौवस्तपुगाद्यौ धनप्रदश्रीप्रदनामानौ जानवीजांकुरश
रावपिहितौ आजिघ्रकलशामितिप्रतिष्ठाप्य धनदायनमः श्रीप्रदायनमः इतिनाममंत्रेणगंधादिनासंपूज्य
स्तगायलंकृतेनतत्र तोरणेविघ्नेशमावाह्यसंपूजयेत् सोमशान्तिकेनत्रपितत्रावाह्यपूजयेत् सर्वतोरणेषु समा

दे॰ प्र॰ नीयकाष्ठानिर्मितमूलनियाने सर्वद्वारकलशानामुपविष्टुनपूर्वादीनां स्थाप्याः इत्युत्तरतोरणपूजा अथद्वारपूजा
११ नत्रप्रथमं पूर्वद्वारे आग्नेयकलशमित्यादिना स्थापनकलशद्वये इन्द्रमावाहयेत् यहेहि हि सर्वामरसिद्धसाध्यैर
भिष्टुतो वृन्दशमेरथाः संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवान्नमस्ते इत्यावाह्य ओं त्रातारमिन्द्रमवितारमिन्द्र
ꣳ हवे हवे सुहवꣳ शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः इति मंत्रेणाऽर्घ्यादिभिः संपू
ज्य इन्द्रः सुरपतिश्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति नमस्कृत्य ओं इन्द्र आसां ने
ता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रमिति पताकामाल
भ्य ओं यो मे दण्डः परापतद्वैहायसोधिभूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेति दण्डमालभ्य ओं त्रातार
मिन्द्रमिति ओं आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेनाः अजयत्साकमिन्द्रः इति मंत्राभ्यां पीतां पताकां च गन्धपुष्पाक्षतादिभिः संपूज्य दद्यात्
सेनाः अजयत्साकमिन्द्रः इति मंत्राभ्यां पीतां पताकामारोपयेत् सांगाय सपरिवाराय द्वाराय समर्पयामि इत्यनेन दद्यात्
नमः भो भो इन्द्र इमं मदीयं गृहाणेमं बलिं गृहाण सपरिवारस्य यजमानस्यायुःकर्ता क्षेमकर्ता भव लोकेशाय
ताकां च गन्धपुष्पादिकं बलिं मयादत्तं गृहाण च पाहि यज्ञमिमं स्थितः इति बलिं समर्पयेत् अनयैव रीत्यानन्तरं दैवा
दैनं सर्वत्र बलिर्देयः ततः प्राचीपतिरग्राह्यो वज्रहस्तः सुराधिपः पूर्वावकाशं रक्षाभिः रक्षणीयं प्रयत्नतः इति
प्रार्थ्य तत्रैव कलशद्वये प्रेम्णा तं दिग्गजानमावाह्य पूजयेत् द्वारपालेभ्यः भूर्लोकाय नमः भुवर्लोकाय नमः
पुनः आदित्याय नमः सोमाय नमः ऋग्वेदायनमः द्वारपालेभ्यो यदि ऐरावताय नमः धनदाय नमः
मः उत्तरांगे गणेशाय नमः श्रियै नमः वज्राय नमः अथ वास्तुपुरुषाय नमः इति संपूज्य ध्वजे ऋग्वेदाय नमः ११
मः ओं यो मे दण्डः परापतद्वैहायसोधिभूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेति ध्वजदण्डमालभ्य

देहेहेतुकाय क्षेत्रपालाय नमः इति नाममंत्रेण गंधादिभिः संपूज्य ऋग्वेदः पद्मपत्राक्षो गायत्र्याः सोमदेवतः अत्रि
गोत्रः कृष्णविग्रहः ऋग्वेदाभिमानी ममाभिमवेति ऋग्वेदं ध्यात्वा सांगं सपरिवारं गंधाद्युपचारैः पूजयेत् शेषपूर्वद्वारे वामभा
गे नंदिने नमः दक्षिणभागे महाकालाय नमः इति द्वारपालावपि पूजयेत् तत्र जपः श्रीसूक्तं पावमानं च साम
सूक्तं सुमंगलं पौरुषं रुद्रसूक्तं च वामदेव्यं तथैव च अग्निमीळे इत्यादिना कविपात्र्यनुवाकान् तथा ऋग्वेदोक्तशां
तिकाध्यायमिति इति पूर्वद्वारपूजा अथाग्नेयकलशपूजा अथाग्नेयकोणगताचम्य पक्वं कलशमाग्नेयं संस्थाप्य त
त्राग्निमावाहयेत् एह्येहि सर्वामरहव्यवाह हव्यवाहमुनिप्रवीरैरभितोऽभिजुष्ट तेजोवता लोकगणेन सार्धं ममाध्व
रं रक्षकवेन नमस्ते इत्यग्निमावाह्य ॐ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे देवाँ आसादयादिह इति गंधाद्युपचारैः
संपूज्य सर्वदेवमयो देवो रक्षोघ्नो वह्निर्महाबलः सप्तजिह्वो महावीर्यो नमो वैश्वानराय ते इति नमस्कृत्य ॐ अग्न
आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि इति रक्तध्वजपताके आलभ्य ॐ त्वं नो अग्ने वरुण
स्य विद्वान् देवस्य हेळोऽवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॐ अग्नि
ं दूतं पुरो दधे हव्यवाहमुपब्रुवे देवाँ आसादयादिह इति मंत्रमुच्चार्य सांगाय सपरिवाराय अग्नये इति ग्र
कारेण घृतौदनबलिदानं ततो यामे दंड इति ध्वजदंडमालभ्य तत्र त्रिपुरघ्नाय क्षेत्रपालाय नमः इति क्षेत्रपाले
गंधादिना संपूज्य बलिं दत्वाग्निं प्रार्थयेत् नमस्ते अग्निरूपाय नमो वैश्वानराय ते वेदरूपाय नमस्ते हव्य य' प
वाहन इति आग्नेयकलशे पुंडरीकं दिग्गजमावाह्य नाममंत्रेण गंधादिना पूजयेत् इत्याग्नेयकलशपूजा अ
थ दक्षिणद्वारपूजा ततो दक्षिणगतावाचम्य प्रतिहारपाले पूर्ववत् स्थापितकलशद्वये धर्मराजमावाहयेत्
एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंदशुचामधीश शिवाय नः पाहि मखं नम

दे॰ प्र॰ स्ते दे॰ हस्ता यमो देवो यम मीयित्वा महाबलः आवाहये धर्मराजं नैऋत्ये प्रेतपते नमः इत्यावाह्य ॐ असि यमो अस्यादित्यो
१२ अर्वन्नसि त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि इति गंधाद्युपचारैः संपूज्य
ॐ यमाय त्वा माखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता [illegible] मध्वानक्तु पृथिव्याः संस्पृशस्पाहि इति मन्त्रा काल
भः यो मे दण्ड इति दण्डालंभः ॐ अग्नयाङ्गिरः अग्निरक्रमेद्दसदन्म [illegible] धुरः पितरं च प्रयन्त्स इति मंत्रेण प्रणमेत् अजपत्राके
उत्क्षेपेत् ॐ सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः अपैतु मृत्युरमृतं न आगात् वैवस्वतो नो अभयं
कृणोतु इति मंत्रं पठित्वा सांगाय सपरिवाराय यमाय पुनः कृष्णकारेण माषभक्तबलिं दद्यात् वैवस्वत महाबाहो
नमस्ते धर्मसागर धिवारापि हितो देवो दिशां रक्ष भवानिति प्रार्थ्य नक्षित्रेवकलशद्वये कामनेदिगाजे संपूज्य द्वा
रशाखयोः स्वर्लोकाय नमः महर्लोकाय नमः भौमाय नमः बुधाय नमः ऋग्वेदयजुर्वेदाय नमः द्वार
शाखयोः गोदावर्यै नमः कृष्णाय नमः उन्नरोगेगणेशाय नमः श्रियै नमः अधोवास्तुपुरुषाय नमः धनेपुर
दीकान्ताय नमः यो मे देह इति देहमालभ्य नत्वा मन्त्रान्ते क्षेत्रपालाय नमः इति नाममंत्रेण गंधादिनावल्यते संपूज्य
कालरात्राय यजुर्वेदस्त्रिष्टुभो विश्वेदेवाः शांतये पायन विषेन्द्रकल्ति केम माखे भयेति यजुर्वेदं पाठ्या इति दत्त्वा नित्यं गंधादि
नार्चयेत् ओं वदक्षिणद्वारे वामगणेशाय नमः दक्षिणभागे ॐ वृषभाय नमः इति द्वारपालानपि पूजयेत् न
त्वजयः ॐ आनो भद्राः क्रतवो यन्तु विश्वतो शिवाननकस्तया यद्देवा त्रीणि च पठेत् ततो होतव्यं तेनमा अभियाअसि
समैव दीर्घायुत्वेन च पठेत् द्यौः शान्तिरेकाय स्वाहा पयः पृथिव्यामेकया ततो मासरस्वत्यै आह्वाय स्वदेवसत्वा
हृदयकरन्यक नमः शंभवे ऽन्यकाग्निदेवताक्रमात् आनारमिंद्रमिन्यकासोमराजानमेकया अग्नपते महाऽऽदद
कं चेवाचेसमग्रकम इति दक्षिणद्वारपूजा ततो मैन्त्यकलशपूजा ततो नैऋत्यगावाऽऽयमायै संस्थाप्य १२

पूर्वं स्थापितकलशे तिष्ठन्तिमावाहयेत् एह्येहि देवगणनायक कलं विशालवेतालपिशाचसंघैः समधरेयापाद्दिग्गुभाधि
नाथ लोकेश्वरस्त्वं भगवन्नमस्ते सर्वेश्वरेनाधिपादेवो नैऋत्निलविग्रहः खड्गवर्मधरो नित्यं निर्ऋतये नमोनमः त्वामा
वाहयामीस्महं पूजां गृहीत एवं यस्मिन्नैत्रयस्यदमेपतिनेनत्वोशनीये इत्यावाह्य ॐ मोक्षणारं द्रात्रष्टन्मादेवैरस्मिन्दिग्भा
नेगुन्निममव्रुयाम रक्षितस्य मीकुषायव्याह विघ्नतोमरुतो वेदनेगी: इतिकृत्स्यपताकालंभः ॐ यद्दर्वै नैऋतनेभा
गस्त्वं ज्वस्वस्वाहेति कृष्णोध्वजपताकां बध्नीयात् ॐ अस्त्वेन मयजमानमित्रं स्तेनसेत्याम विर्द्दिगस्करस्य ग्रन्थ
मस्मादिक्सातनश्यानमोदे विनिर्ऋते तेन भ्योम सितिमंत्रेण गं यादिमातिक्ष्णति पूजयेत् ॐ मोक्षणार इतिमंत्रपठिता सो
गायसपरिवाराय निर्ऋतये स्नुकम्मकारेण कृष्णवीजेन पुराण्णकृतसहितं बलिं दद्यात् ध्वजेवामनायनमः योमेदे
ड इति ध्वजदंडमालभ्य नत्वाग्निजिह्वायतेत्रपालायनमः इतिगंधादिनावलयं तेसंपूज्य तिष्ठन्ति खड्गहस्तं च सर्वलोके
कनायकं आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां राक्षसेभ्यो हि रक्षार्थं भवान्प्रतिष्ठितः निर्विघ्नाय यज्ञभूमिं त्वं
कुरुष्वशिववाहन इति तिष्ठन्तिं प्रार्थयेत् इतिनैर्ऋत्यकलशपूजा अथ पश्चिमद्वारपूजा ततः पश्चिमद्वारदेशपू
र्ववत् स्थापितकलशद्वये वरुणमावाहयेत् एह्येहि यादोगणवारिधीनां गणेनपर्जन्यमहाप्सरोभिः विद्या
धरेंद्रामरगीयमान पाहि त्वमस्मिन्भगवन्नमस्ते पाशहस्तान्मकोदेवोजलराशपयाधिपो महान् निम्नगामीति विख्या
तो वरुणायनमो नमः इत्यावाह्य तत्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह
बोध्युरुशंस मान आयुः प्रमोषीः इति गंधादिनासंपूज्य: पाशहस्तं च वरुणमर्णसां पतिमीश्वरं आवाहयामि य
ज्ञेस्मिन्वरुणाय नमो नमः इति नमस्कृत्य ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके इतिपताकामालभ्य
ॐ उद्उत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम इति

४।

दे॰प्र॰ ध्वजेनोध्वजपताकाध्वजं पूजयेत् । ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशु-
१३ चानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ इति पठित्वा सामगायसमर्पविवाराय वरुणायेमं क्रमप्रकारेण नवनीतमु-
नोदनबलिं दद्यात् । अपांपतिस्त्वमापो वै देवदेव निगद्यसे । शमेन यामुविज्ञानिन नमो मकरवाहन ॥ इति प्रार्थ्य
तस्मिन्नेव कलशाद्वये स्वजनेदिग्गजं संपूज्य द्वारशाखयोः जनलोकायनमः तपोलोकायनमः पुनः द्व-
हस्तनयेनमः शुक्रायनमः ऋद्धौ कुबेरे सामवेदायनमः द्वारशाखयोः नर्मदायैनमः ताप्त्यैनमः उत्तरो
गगणेशायनमः श्रियेनमः अधोवास्तुपुरुषायनमः ध्वजे शंकुकर्णायनमः यामदेड इति ध्वजदेहमाल-
म्ब तस्मिन्कालायनमः क्षेत्रपालायनमः इति गंधादिना बलिं संपूज्य सामवेदस्य पिंगालोजागतः शक्र-
देवतः भारद्वाजस्त्वविप्रैद्वन्द्वत्विक्समभावेन इति सामवेदं ध्यात्वा ॐ अग्न आयाहीति गंधादिना संपूजये-
त् शेषे प्रतिष्ठावामभागे ॐ म्लेच्छगिरस्थेनमः दक्षिणे ॐ स्कंदायनमः इति द्वारपालानपि पूजयेत् तत्र
जपः इंद्रायसामगायत अहमस्मि प्रथमजा ऋतस्य इत्यादि सामानि पठित्वा गायत्रेण कस्यनूनं कतमस्या-
मृतानां सधुक्षियेबृहन्नाम ज्येष्ठसाम रथन्तरं तथाच सामवेदोक्तशान्तिपाठं जपेद्बुधः इति पश्चिमद्वार-
पूजा ततो वायव्यां गत्वा पूर्ववत्स्थापितकलशे वायुमावाहयेत् प्रचेतसं सर्वेममरक्षणायस्तत्रगायिस्तुः
महसिद्धसमेयः प्राणाधिपः कालकवेमहायक्षस्तु भगवन्नमस्ते वायुमाकाशगं देवं पवनं वेगवा-
हिनं आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यताम् इत्यावाह्य तव वायवृतस्पते त्वष्टुर्जामातरद्भुत आवांस्यु- १३
स्याहणीमहे । इति मंत्रेण गंधाद्युपचारैः संपूज्य तस्मिन्नेव कलशोदनपुंजं दिग्गजमप्यवाप्य संपूज्य ॐ आ
नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुपयाहि यज्ञं वायो अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः ।

त

भिः सदा नः इति पताकां लभेत् ॥ ओं वायो येन सहस्रिणो रथासस्तेभिरागहि नियुत्वान्सोमपीतये इति वायुमंत्रेण पता
काध्वजं बद्ध्वा येत् ओं अग्ने नाथि युङ्क्ष्व इति पठित्वा सोमाय सपरिवाराय उक्तक्रमप्रकारेण यथोदनबलिं दद्यात् ततः ध
जे सार्वभौमाय नमः इति गंधादिना संपूज्य प्राणिनां प्राणिहृद्यो यो महाबलपराक्रमः महादेवसुतो गाढ्यो फालि दिगोर
लग्नमंजन इति प्रार्थयेत् इति वायव्यं संपूज्य ततः उत्तरद्वारपूजा ततः उत्तरदेशे गत्वा उत्तमाः सोमस्याप्य पूजा
साकल्यं विधाय पूर्ववत्प्रतिष्ठाप्य शान्तिस्थापितकलशा इमे सोमममावाहयेत् पवित्रे हितपतेसरयरंतो विधन्वन
सत्रगणेन सार्द्धं सर्वौषधीभिः पितृभिः सहैव ब्रह्मणा पूजितो भगवन्समस्ते ततस्त्राणां च सर्वेषां सोमो राजा प्रकीर्तितः
वत्सोगेव महाहस्त सोमो राजा यतेनमः इत्यावाह्य ओं आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा वाजस्य संग
थे इति गंधादिना सोमं संपूज्य सर्वनक्षत्रमध्ये तु सोमो राजा प्रतिष्ठितः तस्मै देवाय सोमाय नक्षत्रपतये नमः ओं सो
मा धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै
इति पताकां लभेत् ॥ ओं वयं सोम व्रते तव मनस्तनूषु बिभ्रतः प्रजावन्तः सचेमहि इति श्वेतवर्णवर्ति पताकाध्वजा
बद्ध्वा येत् वयं सोमो मेति गंधपुष्पदीपादि प्रैयंगवबलिं सोमाय सपरिवाराय सोमायेत्यादि क्रमप्रकारेण बलिं
दद्यात् ततः आलेख्य सोम महारूप नक्षत्राणां च अधीश्वर औषधीनां प्रभो रक्ष दीक्षितं मम सान्निध्ये इति प्रार्थयेत् तस्मिन्ने
व कलशद्वये सार्वभौमं दिग्गजं मावाह्य नाममंत्रेण पूजयेत् ततो द्वारपालेभ्यो सत्यलोकाय नमः ध्रुवलोकाय
नमः ध्रुतः पानेश्वराय नमः राहवे नमः कुबेराय अथर्ववेदाय नमः द्वारपालेभ्यो वेत्रे नमः पयोसिनमः इन्द्र
रोगगणेशाय नमः श्रियै नमः अधोवासुकपुरुषाय नमः धनेशमावाय नमः योमेदेह इति ध्वजदंडं लभेत् तस्मिन्नेक
मादाय हेमवमालाय नमः इति नाममंत्रेण गंधादिना पूजयित्वा सुवर्णनयने अथर्वानुष्टुप्छन्दः पुरोदरः वेदो देवता

दे॰प्र गोत्रस्त्व जलितं मे समाविभवेति यर्वविदंध्यात्वा ॐ शान्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति मंत्रेण
गंधाक्षतपुष्पादिभिः संपूज्य शिवेऽत्र द्वारे वामभागे उमायै नमः दक्षिणे चंडेश्वराय नमः इति द्वारपालावपि पूजयेत् ततस्त
१५ ये अथर्वशिरसं चैव अथर्वशिरसस्तथा तथैव शांतिकाध्यायं पठेद्विप्रस्तथाश्विनः इत्युत्तरद्वारपूजा अथ ईशानस्तंभ
पूजा ततः ईशानस्तंभसमीपं गत्वा आचम्य पूर्वं स्थापितकलशे ईशमावाहयेत् यो हि विश्वस्य तत्त्रिशूलक
पालखट्वांगधरेण सार्धं लोकेश्वरेश्वर यतसिद्धैः स्तुत्वाणपूजां भगवन्नमस्ते सर्वविद्याधिपो देव ईशानो नाम नामतः
14 शूलपाणे महादेव त्रैलोक्याधिपते नमः इत्यावाह्य ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे वोचेम शंतमं हृदे इ
ति गंधादिना संपूज्य ॐ नमः शंभवाय च मयोभवाय चेति पताकामालभ्य ॐ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्व
मवसे हूमहे वयं पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये इति ध्वजपताकाध्वजावुच्छ्रयेत् कद्रुद्रा
येति मंत्रं पठित्वा सगणाय सपरिवाराय ईशानाय अन्यादृक्प्रकारेण गंधाक्षतबलिं दद्यात् रक्तांगरूपे देव त्रिनेत्राय त्रि
शूलिने वृषध्वजाय यज्ञाय नतत्रयतयेनमः इति प्रार्थ्य तस्मिन्नेव कलशे पृथ्वीके गजमावाह्य संपूज्य ध्वजेस्य प्रति
ष्ठायनमः ॐ येषामीशे ऽद्य इति ध्वजदंडमालभ्य तस्मिन्नीशायदेशपालाय नमः इति गंधादिना वल्कलेन संपूज्येशं प्रार्थयेत्
वृषस्कंधसमारूढं शूलहस्तं त्रिलोचनं आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां ततो नैरृत्यपश्चिमयोर्मध्ये कल्पि
ताधःप्रदेशे अनंतमावाहयेत् यो हि पातालधरामरेंद्रनागगणाकिन्नरगीयमानः रक्षोरगेंद्रामरलोकसेवितः अनंतर
ताधरमसदीयम पन्नगाधिपतिर्देव अनंतो नाम नामतः पातालेश्वरनेनिमसनंताय नमोस्तु नमः इत्यावाह्य ॐ नमोस्तु स
र्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः इति गंधादिना संपूज्य मत्स्यपुराणेन आयद्धौ विनिपूज
नमस्के नमोस्तु सर्पेभ्य इति पताकालभ्य ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततमिति मंत्रेण १५

पताकाध्वजावुच्छ्रयेत् ॐ आयङ्गौरिति मन्त्रेण वा ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्क
भायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा इति पठित्वा सांगाय सपरिवाराय अनन्ताय पूर्वक्रमप्रकारेण माष
भक्तबलिं दत्वा योसासाववनेन रूपेण ब्रह्माण्डं सचराचरं पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः इति नमस्कृत्य
अनेन सर्वादनेन सर्वफणाधिपते हरेः त्वयात्र वर्तितं कार्यं भक्तानेत्राय तेन नमः इति प्रार्थ्य ध्वजदेवतायै नमः इति नम
स्कृत्य योमेदं० इति ध्वजदण्डमालभ्य तस्मिन् भैरवाय देवाय पालायनमः इति नाममन्त्रेण गन्धादिबलिं तेन संपूजयेदि
ति इति ध्वजेन पूजा ततः पूर्वं स्थाने यो मध्ये कल्पितो महेशे ब्रह्माणमावाहयेत् प्रागवस्थापितकलशे एह्येहि सर्वाधिप
ते सुरैर्वृतो लोकेन सार्धं पितृदेवताभिः सर्वस्य धाता त्वमितप्रभावो विशाध्वरे नो भगवन्नमस्ते पद्मयोनिश्चतुर्मूर्तिर्वेद
वासः पितामहः आयाहि ब्रह्मलोकात्त्वं तस्मै ब्रह्मात्मने नमः इत्यावाह्य ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्वि सीमतः
सुरुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः इति मन्त्रेण संपूज्य ॐ यद्देवा देवहेडनं
देवासश्चकृमा वयं अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः इति पताकालंभः ॐ ब्रह्मयज्ञानमिति रक्तां पता
काध्वजावुच्छ्रयेत् ततः सांगाय सपरिवाराय ब्रह्मणे श्यामाकक्रमप्रकारेण पायसबलिं दत्वा ब्रह्मयोनिश्चतुर्मूर्ति
वेदावासः पितामहः यज्ञाधिपश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः इति पठित्वा पितामह नमस्तेस्तु कलेशाव्यामरूपिणे
व्यामस्थायन मस्तुभ्यं वत्सदेहं महाप्रभो इति प्रार्थ्य ध्वजस्वप्रभायनमः योमेदं० इति ध्वजालंभः ध्वजदण्डे भूतना
थाय क्षेत्रपालायनमः इति नाममन्त्रेण गन्धादिना बलिं तेन संपूज्य इति ब्रह्मपूजा ततः प्राचमध्ये पश्चिमे ब्रह्मसमीपे ६९२
वायव्यां कृष्णचामरमयूरपिच्छपुनागकृतदण्डः धातुवाहस्तदण्डो दशहस्तदण्डो वा दशहस्तदीर्घो द्विहस्तविस्तृतः प
चहस्तदीर्घो हस्तविस्तृतो वा विचित्रवर्णो महाध्वजः ॐ इन्द्रस्य विष्णोर्वरुणस्य राज्ञ आदित्यानां मरुतां शर्द्ध उग्रं

दे॰प्र॰ महामनसोम्भवनच्युतानां वोषादेवानामयनामदस्यादितिमेत्रेणस्थाप्य ततः प्राच्यां गणानांत्वेति गणपतिं संपूज्य ॐ
१५ नमोस्तु सर्वेभ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमोऽ
स्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः इत्यादिमन्त्रेण दिग्विदिक्षु रुद्रान्सं
स्थाप्य तेभ्यो बलिं दत्वा ईशानभागे सार्वभौतिकबलिं दद्यात् तद्यथा भूमौ त्रिकोणं वर्तुलं चतुष्कोणं मण्डलं वि
धाय तत्र फलपुष्पधूपदीपनैवेद्यादिबलिं निधाय हस्ते समलं गृहीत्वा अथ श्चैव तनये लोकास्तथा स्थावरपन्नगाः सपत्नी
15 परिवाराश्च प्रतिगृह्णन्तु इमं बलिं ये केचिदिह लोकेषु आगता बलिकांक्षिणः तेभ्यो बलिं प्रयच्छामि नमस्कृत्य पु
नः पुनः बलिं गृह्णन्तु इमे देवा आदित्या वसवस्तथा मरुतोश्विनौ देवाः सुपर्णाः पन्नगा ग्रहाः असुरा यातुधा
नाश्च पिशाचा मातरो नगाः शाकिन्यो यक्षवेतालयोगिन्यः पूतनाः शिवाः जृम्भकाः सिद्धगन्धर्वा मालाविद्याधरा नगाः
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः मा विघ्नो मा च मे पापं मा सन्तु परि
पंथिनः सौम्या भवन्तु तृप्ताः देवा भूतगणास्तथा इति बलिं समर्पयेत् तथैव पूर्वभागे त्रैलोक्ये यानि भूतानि स्था
वराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो
देवमातर एव च सर्वे ममाध्वरे रक्षां कुर्वन्तु मुदान्विताः ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह सन्तानमेऽध्वरे सर्वे
रक्षन्तु स्म सर्वतः इति रक्षामन्त्रं पठित्वा क्षेत्रपालबलिदानं कुर्यात् यथा पूर्वदिग्वासि दिक्चतिदिग्भूतादिपति
दिक्षु इदिशान्त दिवक्षेत्रपालेभ्यो देवेभ्यो नमः इति बलिं दत्वा तथैव मण्डपदक्षिणपश्चिमो मदिक्षु नावन दिग्देहेनो
क्रमेण बलीन्दत्वा आचम्य मण्डपद्वारपालेभ्यः सर्वेभ्यो देवेभ्यो नमः वेदशुक्रिनेभ्यो नमः सुष्टुपन्नगेभ्यो नम १५
इति नमस्कृत्य पंचरात्रे नवेणाविचवस्त्रेण वितानं कारयेच्छुभे अथवा शुक्लवस्त्रेण वितानं कारयेच्छुभे उन्नमय

ममध्येन प्रमाणेन समकीर्तिते मंडपस्य प्रमाणेन ज्येष्ठेन तत्स्याद्धितानके मध्यमे वेदिकामात्रं कनिष्ठे मंडलस्याभितिय
जमानः साचार्यो हस्तौ पादौ प्रक्षाल्याचम्य प्राग्द्वारेण मंडपं प्रविश्य दक्षिणद्वारस्य पश्चिमतः उपविश्य यथावि
धिना कर्म कुर्वीतेत्याचार्यप्रेषेयेत् इति मंडपप्रतिष्ठा ततः आचार्यो मस्तावेक्षपरिफलपुष्पसंविते विताने दत्वा
वेद्याः पश्चिमतः उपविश्य अपामार्गपत्रैर्वेदिं समार्जे मंडलं तत्पञ्चगव्येनाप्यमार्जे वेद्यां परिषोडशारचक्रं लिखेत् य
था षोडशाहस्तं कार्यं सदोरकं समादाय यत्नेहस्तं दक्षिणोत्तरायतं प्रासाद्यं विहृदेशे एवं पूर्वपश्चिमायतं प्रास्ता
ध्येन त्रिविन्हदेनाकोणचतुष्टये निष्पन्ने कर्णसूत्रहृदयदानेन समनांतांतासितरजोयुक्तेसूत्रे हस्तहस्तमात्रान्तरिते
विस्तृभक्ष्यादेयमन्नमवारिते विराजमास्तवः कार्यं पंच सप्त अथापि वा बलिश्च विधिनादेयो यथोक्तेन सुरोत्तम यथो ५८
क्तचलार्चाप्रतिष्ठाकारणे ततोतिवर्दयेदन्यां प्रतिमां लक्षणान्वितां निवेदयेत्स्थापयेत् तत्क्षणादेव राजेंद्र तस्य दो

पक्षमध्ये सप्ततिर्वा विंशतिर्वा नीयेत्तां तत्र कारयेत् अथ पाषाणपिण्डिकां पूर्वां प्रयत्नेन चाभिवेदयेत् यद्द्रव्या यत्प्रमाणा
या मूर्तिस्थापिता हरेः तद्द्रव्या तत्प्रमाणा च सा मूर्तिस्तत्र कीर्तिताः यत्प्रमाणा यदाकारा तन्मयं बिंबमुत्तमं तत्प्रमाणं तदा
कारं तन्मानं तत्र विन्यसेत् विहाय पिण्डिकां पूर्वां न हीनेवापरां न्यसेत् द्वितीये वा तृतीये वा दिवसे स्थापयेद्धरिं अत
ऊर्ध्वं भवेद्दोषो विधिनापि निवेशने अनेनैव विधानेन लेप्यादीन्स्तु विसर्जयेत् लेप्यादीनां भल्लि चित्र प्रतिमाः प्रतिष्ठा
पिताः अन्यो विकल्प्य तेन तत्र तत्प्रमाणं तदाकृति पक्षसंलेपनं प्रोक्तं जीर्णोद्धारविधिस्त्वव सर्वेषामेव देवानामेषसा
धारणः स्मृतः यो जीर्णविधिना बिंबं संस्कुर्यान्मानवो भवि फलं दशगुणं तस्य मूलानामस्त्यत्र संशयः वापीकूपतडागा
नां सुरधाम्नां सदा तथा प्रतिमानां सभानां च संस्कर्ता येन रो भवि पुण्यं शतगुणं तस्य भवेन्मूलान संशयः संघायोत्र न
कर्तव्या जीर्णसंस्कारकर्मणि मूलाद्दशगुणं प्रोक्तं पुण्यं कूपे प्रतिष्ठिते प्रतिमायां शतगुणं कूपादेः परिकीर्तितं प्रति
मादेः दशगुणं जीर्णसंस्कारणे भवेदिति कूपप्रतिमयोर्दशगुणशतगुणयोरत्यन्तमहत्तायेत्तयोर्व्यवस्था अग्निपुराणेपि
जीर्णोद्धारप्रकारः प्रासादमण्डपे वा प्रत्यहं द्वारे कृत्वा तोरणं विधाय द्वारपूजादि स्थण्डिले संप्रपूजनं मन्त्रान्संतर्प्य संपू
ज्य वास्तुदेवांस्तु पूर्ववत् दिग्बलिं च ततो दत्वा समाचम्य स्वयं गुरुः ब्राह्मणान्भोजयित्वा तु शंभुं विज्ञापयेत्ततः दु
ष्टलिङ्गमिदं शंभो शान्तिरुद्धरणस्य च तत् हविस्तु वास्तुविधिना अधितिष्ठ च मां शिव एवं विज्ञाप्य देवेशं शान्तिहोमं
समाचरेत् मध्वाज्यक्षीरदूर्वाभिर्मूलेनाष्टाधिकं शतं ततो लिङ्गं च संस्थाप्य पूजयेत्स्थण्डिले तथा लिङ्गे लिङ्गाधिष्ठि
तदेवतां स्थण्डिले संस्थाप्य तत्पर्यैः शं व्यापकेश्वरायेति नाम्नानेन शिवार्चनं ततस्तत्राश्रितेभ्यश्च वारयेदस्त्रमन्त्रतः
सतः कोपि यः कश्चित् लिङ्गमाश्रित्य तिष्ठति लिङ्गं त्यक्त्वा शिवाज्ञया यत्रेष्टं तत्र गच्छतु विद्याविद्येश्वरैः शंभुः शु
भं त्वं च भविष्यति सहस्रं प्रतिभागं च ततः पाशुपतात्मना हुत्वा शान्तिं भजामास तस्याष्टाङ्गैर्जपेत्ततः ब्रह्मशिलापिण्डी

दे॰ प्र॰ लिंगात्मकदेवतां भागत्रयसंस्कारार्थं पाशुपतास्त्रेण हुत्वा शांतिकलशोदकेनाभ्युक्ष्याघोरास्त्रहोमं संपूज्य पाशु
पतं मंत्रं जपेत् दत्वार्घं च विपरीतक्रमेण ततः केवलेनानेन तत्त्वाधिपं स्मृत्वा मूर्तिमूर्तीश्वरौ लिंगपिंडिका संस्थितौ तौ
५९ कः विसृज्य स्वर्णपात्रेण तं पूजां कृत्वा यथास्थानं रक्षाविधानं पानीयं चैवं मंत्रेण पात्रेः ततो लिंगं निःक्षिप्य नीराजनं ततः पुष्पं
ज्ञात्वा यावत्तं नमस्येदिक्षणं तीर्थं चैवास्तु शुद्धे शनैः शनैः रक्षां विधाय तत्र स्थित्वा महापाशुपतास्त्रेण ततः लिंगमभ्यंतरस्थं
त्रसापयेद्विधिवत् गुरुः सिद्धान्तशास्त्रे पि जीर्णोद्धारविधिं वक्ष्ये समासात्तं तत्र चादितः ईशानदक्षिणे वाप्यमंडपं च।
प्रकुर्यात् पूर्वं तत्र पूर्ववत्सर्वमेकाग्रं चैव तोरणं सर्ववस्त्रादि द्वारपालार्चनं तथा स्थंडिले तत्र शिवार्चनं
मंत्राहुतिं पूर्णां कृत्वा वास्तुदेवार्चनं तथा मंत्रेण देवस्थापितकलशान् ग्रंथेऽस्मिन् उक्तं लिंगं यदि शिवभक्तास्तेनोप
पन्न लिंगात्मकं करादीन् प्रतिमां विनाशयेत्तु वै दोषे लिंगमिदं दुष्टं शांतिरस्य यथा द्वितीयो नः तस्मादेनं विधानेन स
पितृष्टमिदं स्थाप्यं भवति तु वचस्तेन प्रोक्तं तद्भावयेद्गुरुः तेन शिवेन प्रोक्तं शांतिर्भवति तु वचोऽस्य तु विभावयेद्
ग्व्यर्थः विज्ञाप्येवं शिवं भक्त्या शांतिहोमं समाचरेत् मधुनाज्येन दुग्धेन हृद्यैर्भिर्मूलमंत्रतः शान्त्यर्थं वन्हौ लेऊ
हेमसहस्रं तज्ज्ञः यजेद्गुरुः ग्रथ्यास्त्रेणाज्जुहुयात् व्याहृतिभिः पूर्णाया वभीयात्कंकणं हेमं देवस्याग्नानकेकरे लिंग
स्याग्रानेकरे भावयित्वा तत्र हेमकंकणं वभीयादित्यर्थः लिंगे संस्थाप्य संपूज्य पूर्वोक्तविधिना ततः सांगं संपूज्य
य भक्त्या स्थंडिले व्यापिकेश्वरं लिंगाश्रितानि भूतानि नाडयेदस्त्रमंत्रतः यानि कानि च भूतानि तिष्ठन्त्यास्मिन् लिंगके
त्वक्रमाः शिवाज्ञया गच्छन्तु स्थानमीप्सितं विद्या विद्येश्वरैर्युक्तः शिवोऽत्र लिंगे भविष्यति इति दत्वा शिवस्याज्ञां
ततो भागत्रये गुरुः हुत्वा चैवास्त्रमंत्रेण तथा पाशुपतास्त्रतः प्रतिभागं सहस्रं च सिंचेत् शान्तिघटोदकैः ब्रह्मशिला ५९
पिंडीलिंगात्मकदेव भागत्रयं संस्कर्तुं त्रिसहस्रमस्त्रमंत्रेण हुत्वा प्रतिभागं कलशसहस्रेण अभिषिंचेदित्यर्थः

मूलमन्त्राग्रकैर्दर्भैः स्पृष्ट्वा च जपमाचरेत् ब्रह्मशिलां मूलेन पिंडीमघोरेण लिंगमघोरेण दर्भैः स्पृष्टेत्यर्थः प्रा
वन्याशुपतास्त्रजपो होमसंख्यया सद्योजातादिवक्रेषु षुद्यादर्घ्यपरान्हुवं सोथभूमौ परित्याज्यं दारुजं चाग्नि
नादहेत् सोथ सुधातुनिर्मितं लिंगं लोहजं तेन कार्यस्याच्छेलमेवाप्सुनिक्षिपेत् सुवर्णादष्टलोहनिर्मितं भग्नं चेत्
नैव सुवर्णादिना न कार्यमित्यर्थः ततस्तेषु ग्रावलिंगमूर्तिस्थितिस्वरानपि लिंगस्याविसर्जनं चापीठब्रह्मशि
लागमात् वृषस्याविसर्जनं हृदंगमूर्तिस्थितानपि ततः सपाशोस्त्रयोगे चर्ममर्जनया वृषस्कंधस्य यावधालि
गं चर्मीकृत्य चर्मणा शिवास्त्रमितिहृदयसज्जेनाप्याहरेद्गुरुः उद्धारार्थं च लिंगस्य तेनो वृषोभ्यां प्रयेत्ततः वहिर्नीत्वात्मनालि
गं पीठं ब्रह्मशिलां वृषं रथादिकं समारोप्य समुद्रे निक्षिपेत्ततः इष्टलिंगप्रतिमा अमृतसमुद्र इत्यादिना सोथभू
मौ परित्याज्यं दारुजं चानले दहेत् सुवर्णाम्बनिक्षिपेन्मोघं लिंगं वायुतिमादिवा स्फटलिंगायने वधोगजं वाप्रव
येद्गुरुः ततः पाशुपतास्त्रेण शान्त्यर्थं जुहुयाच्छतं लोकपालानु भिस्तद्वद्दशकं शान्त्यै शतं शतं प्रतिदेवं शतं शतेनेष्ट्व
कृत्यादित्यर्थः रत्नोऽकर्मा सूतनद्धर्मे महापाशुपतास्त्रेण तन्मात्रेन तत्सं लिंगत्रसंस्थापयेत्ततः प्रतिष्ठोक्तेन मार्गे
णा सर्वं कर्म समाचरेत् हर्म्यस्य परिवाराणां प्रकारार्थे समुद्धतौ सर्वेषामेव जीर्णेनोपप्रवमविधिः स्मृतः कर्तीत्र
द्वितीयादयामूर्वादिभ्योयथादिनं यन्मुण्यस्थापनेप्रोक्ते तत्पलेप्येतद्दृष्टो विधि अथयमेनतिष्कृषेः लत्स्पाफि
स्फटिविशीर्णस्वपवादिमेविनाशोनोलिंगानां नाहशीनां वाहुपादशिरःकर्णस्वनासिकाहीनानां प्रतिमानां च वि
पुल्कप्रकारेण चालनं जलादौ प्रतिपादनं च कृत्वा नूतनप्रकारेणानस्मिंनेव स्थापूर्वं सञ्जातीयद्रव्यसिंतेन मानेत
तदाकारलिंगेनाहर्षी प्रतिमां च स्थापयेत् स्पुटनिम्नविषमस्यादिस्फोटां चंचैव चालनं तेषामेव च पुनःस्था
पने लाभेनाम्नेय च पुनःस्थाप्यानि अनेकशाकलत्वेन स्फुटितत्वेन चोद्धारपुनःस्थापविधिर्मारग्रहतेः चलितचा

दे॰ प्र॰ लितपतितपातितमध्यस्थातां ततो द्वारेणापि त्यागः किं तेषामेव पुनः स्थापनं उद्धृतस्य द्वारा संभवाभिद्दे ष्टेते
न प्रतिपत्तिविषयप्रवृत्तेस्य तथा नदीवेगापहृतानां तत्र शत्रुचौरहस्त्याधिपहृतानां तल्लाभमात्रेण पुनः स्थाप्यानि
६॰ तेषामलाभेन तादृशान्यन्यानि स्थाप्यानि निषिद्धस्पर्शदूषितानि निषिद्धजलस्पृष्टविप्रस्तत्र दूषितपतितानां पर्वणि
म्लेच्छविरामूत्रादिदूषितानां तस्य स्था नाशितानामेव पुनः संस्कारेण तद्वारेण नापि प्रतिपत्तिः एवमेव सस्था
नादचलितस्य प्रतिष्ठितस्य विपन्नहृतदग्धादेशारपि व्यवस्था स्याचलितस्य तु पुनस्तत्रैव प्रतिष्ठा चलितस्य वि
60 हृतस्य च त्यागस्तादृशस्तादृशास्यान्यस्य प्रतिष्ठा च स्थूले पूर्वे पिंडीब्रह्मशिलयोरभुद्धारः प्रतिपत्तिर्विधिना
पिंडीकांतराधिनिवेशः एवं योगेन पूर्वपिंडीकादीनां भग्नेष्वेवमेव पिंडीकायभावेन पिंडिका यन्त्र स्थापन
मात्रे स्ववर्णादि नितभंगादौ तत्तैव स्ववर्णादिना तादृशं तत्परिमाणं चलिंगादि कृत्वा पुनस्तत्रैव स्थाप्यं यदि
तेन स्ववर्णादिना तादृशं कर्तुं न शक्यते तदा समुद्रे प्रक्षिपेत् रत्नजातं समुद्र एव देशे प्रक्षिपेदं अपि सा यदि सर्वकोति
नजह्राति तदा शैव स्थाप्यं इति त्रिविक्रमपद्धतौ इति जीर्णोद्धारनिर्णयो विधिश्च अथ प्रयोगस्तत्र प्रथमः अथ प्रा
सादिकलशारोपणप्रकारः तत्र शुभेह्नि प्रसादादुत्तरदेशे द्वादशहस्तं दशहस्तं वा मंडपं निर्माय तत्र
पंचहस्तं चतुर्हस्तं वा वेदिं निर्माय तदुत्तरे पूर्वे वा स्नानमंडपं निर्माय द्रव्यसंभारं विधाय शुभेह्नि य
जमानो गणेशपूजनाचार्यवरणं तत्कर्म विदध्यात् अथ यजमान शिल्पिपरिचारकसंयुत आचार्यः सर्वोप
करणसंयुतो मंडपमागत्य पश्चिमद्वारेण प्रविश्य प्रवेश्यापूर्वेणः पुण्याहं वाचयित्वा ग्रहहोमं निर्वर्त्य मंडपं प्रवेश्य प्रासा
दवास्तुमंडलं विधाय वर्णकैः संपूज्य वास्तुमंडलदेवतानां पूजनं होमं निर्वर्त्य द्वारतोरणपताकादिकल्पनं क ६५
मेपूर्वं वदियायावस्य स्नानमंडपमागत्य वेदिकायां स्वस्तिके प्रविभद्रासनं निवेश्य वेदिकायां परिकोणेषु चत्व

रकलशान्वारिपूर्णान्सहिरण्यान् वस्त्रावगुण्ठितान् संस्थाप्य श्रीसूक्तेनाभिमंत्र्य गंधादिनाभ्यर्च्याधिवासयेत्
अथ यजमानादिसहितो गुरुः कर्मकुटीं गत्वा कलशपंचभिः कलशैः संस्थाप्य प्रतिष्ठाप्य सार्वभौतिकबलिं दत्वा चम्प
तैलेनाभिज्य चंदनादिनाभिर्च्य सूत्रावेष्टनं समारोप्य शांतिमंडलपूर्वादि चतुष्कोणस्नानमंडपमानयेत् अथ भद्रासनेन त-
मारोप्य पुरतः पुण्याहवाचनं कृत्वा घृतवतीति घृतेनाभ्यज्य मधुमरादिवेति यवमसूरहरिद्रापिष्टेनोद्वर्त्य उष्णोदकेन प्र
क्षाल्य मूर्द्धानं दिवइति वल्मीकादिमृद्भिरुपलिप्य ओं या दिव्या इति गंधोदकेन हिरण्यगर्भ इति पदप्रक्षालोदकेन ओं या
ओषधीरित्यौषध्युदकेन द्रुपदे सम्पृचि सम्पृचस्थेति घृतेनोदकेन स्नापयेत् अथ पूर्वकल्पितवेदिकोणकलशैः तत्र
मानस्तोक इति प्रथमेन विष्णोरराटमसीति द्वितीयेन सोमं सजातमिति तृतीयेन विश्वतश्चक्षुरिति चतुर्थेन इ
ति मंत्रस्नाप्य ओं समुद्रज्येष्ठा इति शुद्धोदकेन स्नापयित्वा देवलिंगकेन मंत्रेणावाह्य गंधाद्युपचारैः संपूज्य वस्त्रेणा
च्छाद्य आभिस्त्वा पूरन्तो नु महति स्कन्धो न्याप्य प्रादक्षिण्येन महामंडपमानीय पश्चिमद्वारेण प्रवेश्य वेद्युपरि शय्या
दिनं शय्यायां सारदारुमैः प्रदेवानि वेश्य गंधादिना संपूज्य भक्ष्यभोज्यादिना परितः संपूज्य विश्वतश्चक्षुरिति सक
लीकृत्य आचार्यः ओं डांति कमागत्य समिध्यादीनुपकल्प्य द्वारपालान्जपाद्यर्थं नियोजयेत् अथाचार्यः ओं डीकृत दधि
दीयमफाभिः पृथक् पृथक् कलशैः संप्रक्तैः स्वाहामंजुयात् पलाशोदुम्बराश्वत्थशम्यपामार्गसमिद्भिश्च यथासंख्येन्द्र
ताकाभि स्वरूणाति लैश्च प्रत्येकमष्टसहस्रं संख्यया अष्टशतं संख्यया वा हुत्वा शांतिकलशे संस्रवान्निक्षिप्य तेनोद
केन पादनाभिहृदयः शिरःस्व कलशस्य स्पृशेत् अथ पुरुषसूक्तं कदनशो विन्यस्य कलशं गंधादिना संपू
ज्य बलिं दत्वा प्रासादमारुह्य स्नानं गंधोदकेन प्रक्षाल्य वस्त्रमानविधिना अस्त्रेण नासादिकं विधाय शांतिमंडलबा
ह्याभिस्त्वैः कलशाशाकादसकलकमानीय तस्मिन्विश्वस्यसमस्तसूत्रे प्रासादे देवलिंगकमंत्रेण कलशालि
ंगकमंत्रेण च प्रतिष्ठाप्य तदुपरि शुक्लमंत्रेणफाटिन्यस्त्रं विन्यसेत् तत्र रुद्रचंडिकेयाग्निमध्ये विसृत्य

स्याग्रकं सूर्यविरिंचिलक्ष्मीणां पञ्च पवमन्येषामभूतनिवारणाय तत्रापुष्पाणि विनिवेशयेत् अथ शिल्पी तां स्थिरी
कृत्य पुष्पमयवारिणा प्रक्षाल्य सर्वफलोदकेन संस्थाप्य गंधपुष्पाद्यैः संपूज्य प्रासादाद्ङ्तीर्थमभ्येत्य साष्टांगं प्रासादप्रा
ण्य पुनरारुह्य गंधादिना प्रपूज्य पुष्पक्षावस्थाप्य त्वान्यवहानि कलशामनिवध्य ईशानभागेन दक्षेण भूमिं स्पृ
शेत् अथाचार्यो मंडपमागत्य कर्मशेषं निवर्त्य पूर्णाहुतिं दत्वा प्रायश्चित्तहोमं निवर्त्य बलिं दत्वा चम्पस्तस्मिन् शिल्पिवर्गं य
जमानमभिषिंचेत् अथाभिषिक्तो यजमानो दक्षिणादिभिराचार्यादीन्पूजयेत् शिल्पिनश्च तेभ्यो भोजनं दद्यादन्ये
भ्यश्च दद्यादिति इति त्रिविक्रमपद्धतौ कलशारोपणप्रयोगः अथ मंडपप्रमाणं पंचरात्रे कनीयान्दशहस्तस्स्या
न्मध्यमो द्वादशोन्मितः तथा षोडशहस्तो मंडपस्यादिहोत्तमः प्रतिष्ठासारसंग्रहे मंडपः स्यात्कलाहस्तः सर्वल
क्षणसंयुतः दशद्वादशहस्तो वा द्विद्विवृद्ध्या ततः क्रमात् लिंगपुराणे तुलापुरुषप्रकरणे विंशद्धस्तप्रमाणेन मं
डपः कारयेद्बुधः अथाष्टादशहस्तेन कलाहस्तेन वा पुनः इति विंशतिहस्तोप्युक्तः मंडपनिर्माणप्रकारः पंच
रात्रे ऊर्ध्वादेकवंशायोगेन चतुर्द्वारोपमं मंडपान् सारदारुमयान्स्तम्भान्द्विकान्कुर्यात्तत्समान् मंडपार्धोच्छ्रिता
न्वेदस्तंभानष्टौ स्थापयेत्ततो स्तम्भा पंचमांशान्यमेद्भूमौ सर्वसुपार्वणो विधिः बलिकामर्द्दनस्तेषां स्तंभद्वादशकं पुनः
बाह्यपीठप्रमाणेन तत्रस्तत्रविभागतः कल्पयेद्दिक्षु द्वारं च तोरणोपलहृद्दितः मध्यमोन्नमयोर्वेदीं मंडपस्य त्रिभा
गतः चतुर्थांशोच्छ्रितिस्तस्याः त्रिसप्तपंचमो पि वा नवैकादशहीनां वा इष्टकाभिः प्रकल्पयेत् इति द्वारदेहल्याव
हिर्हस्तमात्रेण द्वारशाखाभिर्युता द्वारेषु कार्याणि चतोरणानि यथाविधि क्षीरवनस्पतीनां हस्तेन विस्तारयेत्त्वा
दिमानस्यात् ब्रह्मवेदे तदिह स्तं वहिस्तत्र तोरणानि निवेशयेदिति पताकाः ध्वजाश्च लोकपालवर्णाः प
विताः पताका मध्ये ध्वजं किंकिणिकायुतः स्यादिति लोकपालवर्णास्तु इंद्रः पीतो यमः श्यामो वरुणः स्फटिक
भः कुबेरस्तु सुवर्णाभो ह्यग्निश्चापि सुवर्णभः तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ईशानस्तु भवेद्धंक ६१

पर्वं ध्यायेद्धि मानक्रमात् इति सप्तहस्ताः पताकास्तु सप्तमांशेन विस्तृताः लोकपालानुवर्णेन वर्णेनादिनभ्र
भाः पीतरक्तादिवर्णाश्च पंचहस्तध्वजास्तथा द्विपंचहस्तो दंडश्च वेणवो वैसुतास्तथा शाकदंडस्तु पताकाः प्रकीर्तित
वेनोक्ताः पंचहस्ताध्वजाः कार्या वेणुल्पनद्विहस्तकाः सप्तहस्तापताकास्तु विंशत्यंगुलविस्तृताः पंचहस्तसमायुत
ध्वजे ऊर्ध्वाद्विचतुरः वैपुल्यं चास्य कुंडीनषोडशांगुलमष्टमिते सप्तहस्तोच्छ्रितस्तथास्य कार्यो दंडः स्तुतान्तमः
सप्तहस्तानंतरः दैर्घ्ये विस्तारे द्वादशांगुलाः द्विपंचहस्तदंडेषु पताकास्तु निवेशयेदिति दशहस्तापताकानां दंडा वे
णवेष्टिताः सिंहनाककुंडाश्च धूम्राश्चसमाश्मेदिसमन्विभाः हरिताः पांडुराश्वेता नंद्याः पूर्वादितः क्रमात् एवं वर्णाः शुभाः
कार्याः पताकापाकशासनेति अथ कुंडानि भविष्यपुराणे वेदीपादांतरे त्यक्त्वा कुंडानि नवपंच वा वेदास्त्वात्मपवर्गातिसु
वर्त्तलान्यथवा कुर्यात् इति श्रीमन्त्रायरहस्ये कुंडानि चतुरस्राणि कृत्वानानाकृतीनि वा नव पंचाथवैकं वा कर्त्तव्यं लक्ष
णान्वितं नवकुंडविधाने तु दिक्षु कुंडाष्टकं स्थितं नवमं कारयेत्कुंडं पूर्वेशानदिगंतरे विधानं पंचकुंडानामीशाने पंच
मं भवेत् चतुः कुंडीपक्षे तु वाते नास्तीति हेमाद्रौ नारदीये त्वेकपक्षे कुंडं चतुरस्रं तत्र कर्मणि वेदास्रमर्द्धचंद्रं च वृत्तं
पद्मनिभं तथा षड्वर्धं वृत्तयं कुंडं स्वप्रमाणे समाचरेत् ऊर्ध्वं कुंडानि चत्वारि विधाच्चादिषु विचक्षणः कुंडं वा पंचरेवैव सप्त
पादकरसंमिते विंशांगुलवा कर्त्तव्यं मतं वर्ण्डपीठयोः अथवेतनमत्के चूडामणौ चतुर्विंशतिसमभागमंगलं परिकल्प
येत् चतुर्विंशांगुलहस्तं कुंडानां परिकल्पयेत् हस्तमात्रं खलेनित्यं ग्रहं मेखलयामहेति पिंगलमते खातादेका
गुलेन्यत्र मेखलाविस्थितिर्भवेत् सर्वेषामेव कुंडानामेकादेति स्तपवत्वा कुंडांगुलाहः हि कार्या मेखलकामुंडंगुला
चतुरस्रेष्वंगुलावापिनि समसर्वत्र शोभना इति मेखलास्त्रिणं पंचकार्याः कोणरामपामांगुले रितिच कोणाचतुराः चतुरंगु
लद्वौगुलं तच्च विस्तारेच्चतायामपि अथ योनिस्वायंभुवे मेखलामध्यतोयोनिः कुंडाद्धंध्र्यषाविस्तृताः ऊर्ध्वमुंड

दे॰ प्र॰ एकं कार्यो भुस्पदलाकृतिः ॐ डाईदीर्यौ अंशाविस्तृताः मूले अग्रे भुन्यदलवत्संज्ञविता: अग्रोष्ठंॐउदमध्यताग्रावि
ष्टयोन्यग्रकं कोतिमेवविसा त्रैलोक्यमारे दैर्घ्यान्त यौगुलायातिस्थ्योनाविस्तरेणतु यकंगुलाछ्रितासात्प्रति
६२ ष्ठाभ्यनतरेनया ॐ भहयसमासुकाश्वाभ्यन्यदलवन्मता अगुष्ठेमाविलायुकामध्येताज्यष्ठमिलमा अग्रेणाना
देर्घ्यान्त अष्टागुलेनियावत् यारदातिलुके स्थलादारम्भतालसाचोन्यामध्यमवेध्यके यामाग्निर्यामिकेश्रा
62 नाभाकायानिकदस्नुवा पूर्वेमाव्यस्मताः शाव्वा युग्मायोमासमविताः इति तत्रैव ॐ हूलाकास्यैदेनताभि
मेवुजमेतिमो तत्कुंडानुत्तरयोवामानमस्यानियपते मुष्टारत्निकरस्तातानाभिकत्मे यत्नोमता मवबदांगु
गुलोपेताॐ हेब्रन्येषुवहेयेत् यवहयक्रमेणैवनाभिं स्थगुदारदी इति तत्रैवेदांगुलोपेता उध मायोश्चू
होगुलाविस्तारायामयोश्चतरेगुलेत्यर्थः द्विद्विमचतुर्हिस्फविस्तारायामयोः षष्ठोशाविस्तारपरा उन्नताया
हादशांशामवेतिभावः विश्वकर्मा विनादिकेमवेद्दोगी हीनेपेनुयनत्रयः भार्याविनाशोभ्रोक्ते ॐ हेया
न्याविनाकृते अयत्वधंसमयोक्ते ॐ इयत्कंठवर्जितमितिमितिहानशाश्वे मानहीनेभवेद्व्याधिरधिकेस्यतुव
हते यातिहीनेत्वयस्मारोवागचीनः कंठवर्जिते तत्रैवस्थंडिलस्यापि ॐवीनस्तमिहमेकातमिने हस्तमाशातु
विस्तारे स्तघमेग्रगुलोन्नतमिति। शारदायां॥ तिस्तेतमिति केहोमस्थंडिलेवासमाचरेत् तुलमात्रातमकुर्या
द्वालुकाभिःसुशोभना मिति ॐ उसंइपविधिः समाप्तः ॥ तन्निर्माणप्रकारस्तविस्तृतः ॐ इकं त्वकुमा
दावन्नुमेययः अथसमिधः आलशमीपलाशान्यथायस्लतवकंकतोद्भव अश्वत्थोडुंबरौविल्वचंदनः सरल
लस्था शालश्चदेवदारुश्चखदिरश्चेतियज्ञियाः कर्मप्रदीपे नांगुलादधिकाकार्यासमित्स्थूलतयाक्वचि ३
त् नवियुक्तात्वचाचैवनसकीटानयाटिता प्रादेशान्नाधिकानोनातनतथास्याद्विशाखिका नसपर्णानवी

कार्यो होमकर्म जानता इति भविष्यपुराणे भूमौ स्थितेन पात्रेण विहितेन च पाणिना वामेन पदशार्दूल नोत्तदि
तेन हूयते यत्नाणुयाहुतो वास्तोमतीर्थेन मध्यगं हवनं तेन कर्तव्यं कर्तव्यं वापनं तथा कात्यायनः स्रुवाङ्गु
तिद्वादशापर्वस्मृतिकारस्मादिना चेत्स्रुवपर्वस्मृतिना देवतनीर्थेन च हूयते हविः स्वगाणिनीस्वचिथिन च पात्रके
यानि चिषिज्रहान्यग्रेव्यगाविशाचपाचके मेदाग्रीरामयावी चदरिद्रश्चोपजायते तस्मात्समिद्धे होतव्यं नासम
मिद्धे कथंचन आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकं तथा जुहुयाच्च हविद्रव्यं पाणिना सर्वं स्रुवादिभिः तज्जु
यो दक्षिणेदमम जुर्यान्तर्व्यंजनादिना स्रावेणैव धमेदतिस्रुवेणाधिःप्रजायते स्रुविनाग्निदमनं जुयादित्यवपः
स्रुवेणाग्निदमनेनेति ष्टमाह स्रुवेणाधीति वक्ष्यपरिशिष्टे अथात्रुपः स्रुवमेन जुहुयादाज्यनाशने यजमानोभ
वेदंय मश्वरश्मिश्रुक्कमसइति ग्रंथान्तरे होमे स्रुक्पात्रपः प्रोक्ता स्रुगी हंसी चमूकरी स्यकरी करसंकोची हंसीमुक्क
कनिष्ठिका स्रुगी कनिष्ठान र्जन्यो मृक्ताक्षिस्य हीरिताः शान्तिपौष्टिककर्मादौ स्रुगी हंसी प्रकीर्तिता इति अथा
दित्यादिग्रहस्थापने वर्णरूपस्थानैर्युक्तान्यास्यन्यावाहयेत्तनान् ॥ मात्स्ये ॥ देवानां नवसंस्थाप्याधिशान्तिद्वादशा
धिका आदित्याभिमुखास्सर्वे साधिप्रत्यधिदेवताः ग्रहाणां दक्षिणपार्श्वेस्थाप्यपदाधिदेवताः तेषामेवोत्तरेमा
गे न्यसेत्प्रत्यधिदेवताः विनायकादिस्थापने ग्रहोत्तरे इति मंत्रदायः दक्षिणपश्चिमवायव्योत्तरपूर्वेषु यथाक्रम
वित्येत्यं राज्ञ मेददिने शानो मन्त्रस्या यथाक्रमात्क्रमं गणेशाद्दुर्गावायुं च राजकेतोनोस्य दक्षिणे आकाशमश्वि
नौ चेति पंचनान्स्थापयेत्क्रुपः इति वचनात् सारेणेति भट्टरूपनारायणे अथ पंचवक्त्रीनिर्णय देवीपुराणे
लिंगमस्तकविस्तारो लिंगोच्छ्रायसमो मतः पीठपिस्तत्त्रिगुणितस्तत्पीठं व्यवस्थिते आणालिकान्तर्थवस्मात्
पंचवक्त्रीविनिर्णयः प्रागुदक्प्रवणान ह स्रुशास्त्रालक्षणाविना यविवेष्टत्रिभागेन लिंगमंतत्रकारयेत् वि

द॰प्र॰ स्तारेण तत्समानेन च मूले चाग्रेण तदर्द्धतः जलमार्गश्च कर्तव्यस्त्रिभागेन सशोभनः लिंगस्यार्द्धत्रिभागेन स्थौल्येन सम
धिष्ठितः मेखलान्त्रिभागेन खातेनैव तत्समानः अथवा पादहीनेन शोभनेन तत्र कारयेत् उत्तरस्यां प्रणालं च
६३ प्रमाणादधिकं भवेदिति अथ लिंगमस्तकविस्तारं लिंगोच्चतां समं कृत्वा तद्द्विगुणेन सूत्रवेष्टनाद्धि लिंगस्थौ
ल्यं कृत्वा तत्समविस्तारमध्यभागे च पीठं कुर्यात् पीठोच्चतां लिंगोच्चताद्विगुणः पीठमध्ये लिंगाद्विगुणस्थूल
63 पीठोच्चतां तृतीयांशेन कंठं कृत्वा तस्यार्द्धमध्यस्थमेव पद्मपत्रं यथा कृत्वा लिंगविस्तारषष्ठांशेन पीठोपरि
वाह्यमेखलां कृत्वा तदंतः मेखलाग्रेण तत्समखातं कृत्वा पीठाद्बहिः लिंगसमदीर्घां पीठार्द्धदीर्घां वा अग्रमूले दैर्घ्यवि
स्ताराग्रेण तदर्द्धविस्तारां तृतीयांशेन मध्यखातां पीठवत्सममेखलां प्रणालिकां कुर्यादिति नालिकोर्थः अत्र
मूलसिद्धान्तशास्त्रे विशेषमेवानुसंधेयः॥ सिद्धान्तशेखरे लिंगमस्तकविस्तारे त्रयोभागं प्रकल्पयेत् नाहे
न त्रिगुणं कुर्यान्नाहवत्पीठविस्तृतिं भूतांशाद्द्विगुणं कुर्याद् उन्नतं पीठमुत्तमं हीनं वा चतुरस्रं वा मध्ये कंठसमन्वि
ते द्विगुणं लिंगनाहाच्च कंठनाहं समाचरेत् त्रिमेखलमध्यभागे समं खातं द्विमेखले लिंगमस्तकविस्तारेष
ड्भागैर्विभजेत्ततः मेखलामेकभागेन कुर्यात् खातं च तत्समं लिंगदैर्घ्यसमं कुर्यात् प्रणालं पीठवास्तुतः विस्ता
रेण तत्समं मूले तदग्रे च तदर्द्धतः जलमार्गश्च कर्तव्यस्तस्य मध्ये त्रिभागतः कुर्यात्पीठार्द्धदीर्घं वा प्रणालं च विधिविदि
ते सर्वेषां रत्नलिंगानां सपीठानां विशेषतः लोहादीनां च लिंगानां मेखलत्रयमाचरेत् इति पंचमः पीठनिर्णयः
अथ रक्षामन्त्राः ओं रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखा
नेदमहं तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानोत्कृत्याद्भिरामि स्वराडसि सपत्नहा सत्रराड ६३
स्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा रक्षोहणो वो वलगहनो प्रोक्षामि वैष्णवान्

तोरनोवावलगहनोवनयामिवैलवान् रक्षोहणोवावलगहनोवस्तृणामिवैलवान् रक्षोहणोवोवलहनेग ६ग
हनाः उपदधामिवैलवी रक्षोहणोवावलगहनोपर्यूहामिवैलवीवैलवमसिवैलवास्थः ग्रस्तुष्ट ॥९॥ रतः
प्रस्तुष्ट्याः ग्रातनयानिष्टमं॥ रक्षोहनिष्ट्याः ग्रातनया उर्वन्तरिक्षमन्वेमि वेष्यविष्टदाग्रुषोन्हेः पाहिस्रुणा
धीगिरः रक्षोणोकमग्नन्मनामानः ॥९॥ सोः ग्ररक्षेषाभूर्तिः प्रणामर्त्यस्यः रक्षोहणोग्रह्मणस्पते ग्रयवोच
दधिवक्राग्रग्नमोदैव्योाभिषुक ग्रहीं ग्रग्नर्वेजम्भयन्नवीध्र्यानयान्याधराचीपरास्व: गंहणघपाजः प्रसि
तिंन्नष्टग्ट्यायाहिराजेवामवो २ इभेनतिष्ठीमनुप्रसितिन्द्रूनाशोस्तासिविद्यरक्षतनस्तपिष्ठैः नवग्रमासःग्रा
सुयापतन्त्वनुस्पृशधृषाताशोशुचानः तपूं॥ ग्नेग्रजुह्वापतत्रानसन्दितोविसृजविष्वगुल्काः प्रतिस्पशः
शोविसृजन्तूर्णितमोभवापायुर्विशोग्रस्याग्रदब्धः योनोदूरे ग्रघशंसो योग्रन्यग्नेमाकिष्टेव्यथिरादधर्
षीत् उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्रा २ ग्रोषतात्तिग्महेते योनोः ग्ररातिंसमिधानचक्रेनीचातंधक्षतसम
नशुष्कम् ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदेव्यान्यग्ने ग्रवस्थिरातनुहियातजूनांजामिमजामिम
प्रमृणीहि शत्रून् ग्रथपवमानसूक्तम् गंपुनन्तुमापितरः सोम्यासः पुनन्तुपितामहाः पुनन्तुप्रपिता
महाः पवित्रेणशतायुषा पुनन्तुमापितामहा पुनन्तुप्रपितामहाः पवित्रेणशतायुषा विश्वमायुर्व्यश्नवैः ८
ग्रग्नग्रायुपुनीहिमा ॥९॥ षिपवसः ग्रासुवोर्जमिषंचनः ग्रारेवाधस्वदुच्छुनाम् २ पुनन्तुमादेवजनाः पुनन्तु
मनसाधियः पुनन्तुविश्वाभूतानिजातवेदपुनीहिमा ३ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत् ग्रग्नेक्र
त्वाक्रतूं॥९॥रनु ४ यत्तेपवित्रमर्चिष्यग्नेविततमन्तरा ब्रह्मतेनपुनातुमा ५ पवमानःसोग्रद्यनःपवित्रे
णविचर्षणिः यःपोतासपुनातुमा ६ उभाभ्यान्देवसवितः पवित्रेणसवेन मांपुनीहीविश्वतः ७

दे॰ प्र॰ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणा-
म् ॥ इति हुत्वा कांडीमंत्रकामेत्राः ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व-
६४ ꣳहसः यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः य-
दि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा वयम् सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ अथ रुद्रप्रति-
छायायोगिसूक्तम् ॥ इमा रुद्रायेत्येकादशर्चस्य कुत्स ऋषिः आद्या नव जगत्यो ऽन्ते द्वे त्रिष्टुभौ जपे विनियोगः ॐ इ-
मा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि-
न्ननातुरम् ॥ मृला नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते यच्छं च योश्च मनुरायेजे पिता तद-
श्याम तव रुद्र प्रणीतिषु अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः सुम्नायन्निद्विशो अस्मा-
कमाचरारिष्टवीरा जुहवाम ते हविः त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे निह्वयामहे आरे अस्मद्दैव्यं हेलो
अस्यतु सुमतिमिद्वयमस्या वृणीमहे दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे हस्ते बि-
भ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्द्धन-
म् रास्वा च नो अमृत मर्त्यभोजनं त्मने तोकाय तनयाय मृलया मा नो महान्तमुत मा नो अर्भकं मा
न उक्षन्तमुत मा न उक्षितम् मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः मा नस्तोके
तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा
हवामहे उप ते स्तोमान् पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे भद्रा हि ते सुमतिर्मृलयत्तमाथा ६४
वयमव रुद्रीते वृणीमहे आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु मृला च नो अधि च ब्रूहि

दैवी यो दै देवादानवा यामियक्ष द्विर्वहौ प्रवोचामनमोऽप्रसा॰ प्रसवा सपोतनेनोहवेरुद्रोमरुत्वान न
मौमि मे मावारुणामामहनामदितिः सिन्धुः पृथिवी उपद्यौः ॥ इतिरुद्रसूक्तं अथवालपूजायां अवसके
वमामेय॥ यत्तोन्नवादोदवलिस्तवाहारोभविष्यति वास्तुपूज्यामऊर्वीणस्तवाहारोभविष्यति अथशिव
महापूजाप्रयोगः प्रथमंसामग्रीसंमस्तिविधाय गणेशंसंपूज्य यजमानासिंपुंडूयावर्णाऊर्यात् यथाग्नि
होत्राङ्गवे शोधिते भस्मानीयैकादशवारंमूलेनाभिमंत्र्य ॐब्रह्मणेनमोललाटे ॐहव्यवाहनायनमोहृदि॰
ॐस्कंधायनमोनाभौ॰ ॐमूलेननमोकंठे॰ ॐनमोरुद्रायदक्षिणबाहुमूले॰ आदित्यायनमोवाहुमूले॰ ॐवरु॰
णायनमोमणिबंधे॰ ॐहरायनमोपृष्ठे॰ ॐशंभवेनमोकक्षदि॰ ॐपरात्मनेनमःशिरसि इत्यंगेषुधृत्वा
रुद्राक्षमालांधृत्वा अर्घ्यंसंस्थाप्य रविंध्यात्वा ॐहंसःशुचिषदमादित्यामखिलंलक्ष्मीप्रकृत स्तोहमितिमंत्रेण न
मस्कृत्यार्घ्यंदत्वा संपूज्यसमास्थापनेविधाय द्वारपूजां कुर्यात् यथा उपरितनदेहल्यां मध्ये ॐग्र
श्रियैनमः तद्दक्षिणभागेविघ्नेशायै॰ वामेसरस्वत्यै॰ द्वारशाखोपरि विघ्नायनमः वामशाखोपरि॰ क्षे
त्रपालाय॰ दक्षिणशाखायांगंगायै॰ वामशाखायांयमुनायां दक्षिणे धंधात्रेनमः वामे विधात्रे
दक्षिणशाखेनिधये॰ वामे पद्मनिधये॰ वामे॰ पद्मनिधये॰ दहल्यामस्त्रायफट् नमइतिसंपूज्य द्वारपा
लार्चनंयत पूर्वद्वारेवामभागे नंदिनेनमः दक्षिणद्वारे॰ ममहाकालायनमः चंडेश्वरायनमइतिद्वा
रस्यपूजांविधाय॰ पार्ष्णिघातेनान्तर्हीना भूतानुत्सादयेत् ॐअपसर्पन्तुये भूतायेभूताभवसंस्थिताः ये
भूताविघ्नकर्त्तारस्तेनश्यन्तुशिवाज्ञया अपक्रामन्तुभूतानिपिशाचासर्वतोदिशं सर्वेषामविरोधेनब्र
ह्मकर्मसमारभेत् इतिवचनात्ह्रासनात संकोचेन तेसामाहेद्यात् ततोमन्त्रस्तुष्ट्यादि मातृकांतकर्म

दे॰ प्र॰ नित्यपूजाप्रकारोयं प्रकारेणनिर्दिश्यते मंत्रन्यासं अर्पयेत् यथा अस्य श्रीवामदेवमंत्रस्य वामदेव ऋषिः
पंक्तिश्छन्दः सदाशिवो देवता ॐ बीजं उमा शक्तिः न्यासे विनियोगः ॐ वामदेव ऋषये नमः शिरसि पं
क्तिच्छन्दसे नमो मुखे सदाशिवो देवतायै नमो हृदि ॐ बीजाय नमो गुह्ये उमाशक्तये नमः पादयोः
६४ ॐ नें नमस्तत्पुरुषाय नमः तर्जन्योः मं अघोराय मध्यमयोः शिं सद्योजाताय कनिष्ठकयोः वां वामदेवाय
अनामिकयोः यं ईशानाय अंगुष्ठयोः इति न्यस्य न्यासान् एवं विदध्यात् नें नमस्तत्पुरुषाय वक्त्रे मं अघोराय
हृदये शिं सद्योजाताय पादयोः वां वामदेवाय गुह्ये यं ईशानाय शिरसि ॐ नें नमस्तत्पुरुषाय पूर्ववक्त्रा
य मुखे मं अघोराय दक्षिणवक्त्राय दक्षिणकर्णे शिं सद्योजाताय पश्चिमवक्त्राय चूडायः वां वामदेवाय
उत्तरवक्त्राय वामकर्णे यं ईशानाय ऊर्ध्ववक्त्राय शिरसि ॐ सर्वशक्तिधाम्ने ॐ अंगुष्ठाभ्यां नमः नें नित्यतृ
प्तिधाम्ने तर्जनीभ्यां नमः मं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः शिं स्वतन्त्रशक्तिधाम्ने अनामिका
भ्यां नमः वां अलुप्तशक्तिधाम्ने कनिष्ठकाभ्यां नमः यं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः सर्वश
क्तिधाम्ने हृदयाय नमः ॐ नें नित्यतृप्तिधाम्ने शिरसे स्वाहा मं अनादिशक्तिधाम्ने शिखायै वौषट् शि
स्वतन्त्रशक्तिधाम्ने कवचाय हुं वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट् यं अनन्तशक्तिधाम्ने अस्त्राय फट्
इति मंत्रंन्यस्य स्वशरीरे मतृकादिपरतत्वान्तानि न्यस्य हृद्यष्टदलकुसुमेष्वेव वामादिशक्तिना
वकं न्यस्य नवध्यायेन्नित्यं महेशमिति सदाशिवं ध्यात्वा मानसोपचारैः संपूज्य प्रार्थयेत्
स्वागतं देवदेवेश सन्निधौ भव मे हरः गृहाण मम सौम्य पूजां यथार्थपरिभाविता मिति ततः आ ६४
नं देवस्वरूपं संचिन्त्य बाह्यपूजारम्भेन यथा भूमौ स्थाप्य त्रिकोण वृत्तचतुरस्रं मंडलं वि

65

याय नमः अर्घपात्रं साधारणीं संस्थाप्यार्घपात्रं गुडवारिणा पूर्य तन्त्रोऊँ अशमुद्रया सूर्यमंडलानी धान्यावाह्य संपूज्य
प्रोक्षणोदकेन आत्मानं पूजासामग्रीं संप्रोक्ष्य प्राणानायम्य देशकालौ संकीर्त्यामुकोऽहं ममसकलपापक्षयपू
र्वक सर्वाभीष्टावाप्तये शिवप्रीतये वा शतनशतपलपरिमितपंचामृतद्रव्यनदशाष्टगुणितम भीनतोदकस्नप
नसहितं षोडशोपचारैः शिवलिंगे अमुकशिवस्य महापूजनं करिष्ये इति संकल्प्य पीठपूजां कुर्यात् ऊँ मंडू
कायनमः कालाग्निरुद्रायनमः ऊँ आधारशक्तयेनमः प्रकृत्यै· कूर्माय· अनंताय· वराहाय· पृथिव्यै·
सुधार्णवाय· श्वेतद्वीपाय· मणिमंडलाय· कल्पवृक्षेभ्यः कर्णिसिंहासनाय· सितछत्राय· श्वेतचामराभ्यां·
धर्माय· ज्ञानाय· वैराग्याय ऐश्वर्याय· अधर्माय· अज्ञानाय· अवैराग्याय अनैश्वर्याय सप्तपातालवलयोपे
तासत्त्वशीर्षायानंतायनमः· आनंदकंदायनमः· संविन्नालायनमः· प्रकृतिमयपत्रेभ्यो विकारमय
केसरेभ्यो पंचाशद्वर्णबीजाढ्यकर्णिकायै· सं सत्त्वाय· रं रजसे· तं तमसे· अं द्वादशकलात्मने सूर्यमंडला
यनमः उं षोडशकलात्मने चंद्रमंडलायनमः मं दशकलात्मने अग्निमंडलायनमः आं आत्मने· अं अं
तरात्मने· पं परमात्मने· ह्रीं ज्ञानात्मने· मां मायातत्त्वाय· वं विद्यातत्त्वाय· कं कलातत्त्वाय· पं परतत्त्वाय· इ
ति संपूज्य दलेषु शक्तीः पूजयेत् श्वेतवर्णायै वामायैनमः कृष्णवर्णायै ज्येष्ठायैनमः रक्तवर्णायै रौद्र्यै
नमः पीतवर्णायै काल्यैनमः श्यामवर्णायै· कलविकरिण्यै· अग्निवर्णायै· बलविकरिण्यै· शुक्लवर्णा
बलप्रमथिन्यै· अंजनवर्णाय· सर्वभूतदमन्यै· मध्ये जपापुष्पवर्णाय· मनोन्मन्यै· ऊँ नमो भगवते सदा
शिवाय सकलगुणात्मशक्तियुक्ताय अनंताय· योगपीठात्मने नमः इति पीठपूजां विधाय ध्यायेत् माहीर
स्फटिकधवलं रजताद्रिसमप्रभं चारुचंद्रकलाराजज्जटामुकुटमंडितं पंचवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलो

दे॰ प्र॰ ॰वतं शार्दूलचर्मवसनं रत्नाभरणभूषितं दशोर्द्ध्वहस्तेषु पद्मं वरं च नदयःकरे वामोर्द्ध्वहस्ते हरिणं दधानं नमभ
६६ यप्रदं सव्यसव्यसव्यको भोजं नित्विषुपद्मं विष्टरे ब्रह्मविष्णुमहेशाद्यैः सकलं नमस्यामस्तु रामस्तुवैः विश्वाधीशं विश्ववपुषं भव
भीतिहरं शुभं ॥ इति ध्यात्वा आवाहयेत् स्वामिन्सर्वजगन्नाथ त्वामयं पुरुषोत्तमः शरणं यामि वह्न्याद्या मूर्त्ता
वावाहयामि हृ ॥ इति ततः स्थिरीकरणं स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं तावत्त्वं प्रीतिभावेन लिंगेऽस्मि
न्सन्निधितो भवेति ततः प्राणप्रतिष्ठां कृत्वा वाहनादिसद्भावस्तनदेवसर्वं प्रदर्शयेत् ततः आसनं विष्णवासनेन तु
सन्तकृम्यं शोभं देवसर्वजित्सुवे रक्तसिंहासनं चारुगदहालायपरमेश्वरः सर्वान्तर्यामिणे देवसर्ववीजमयं शुभं
स्वात्मस्थमस्यपरंशुद्धमासनं कल्पयामि हृ ॥ इति रत्नजटितं सवर्णपीठकं वलादियुक्तं भद्रपीठवासपेसस्था
प्य निवेदयेत् अस्मिन्वरासने देव सुखासीनो स्वरात्मकः प्रतिष्ठितो भवेशान प्रसीद परमेश्वर इति निवेद्य ॥
तस्मिन्नावतन्यावषेशामनिपापयेत अनन्याम्न देवेश शक्तिविषयप्रभो उकस्यानिध्यमस्यावभक्तानु
गृहत्त्वयेति ततस्त्वनिरूपयान रूपयान्त देवेशा रूपं भो यम सदाशिव यानमानं देवत्वं मे वातिकृतं णमिगुरो
गुरु इति ततोऽभिमुखीकुर्यात् अनानाद्याप्रमादस्वा वैकल्यात्मायनस्यवा ममशुण्णीभवेत्सत्वेनयाप्यभि
मुखोभव इति ततोगुंठयेत् अभकवाञ्छ्नम्बुत्स्वहेशापितमहाफले स्वतेजःपंजरेणाशु वेष्टितोभवशं
करेति ततः स्वागतीकुर्यात् यस्यदर्शनमिच्छन्ति दयासाभीष्टसिद्धये तस्मैते परमेशान स्वागतं स्वागतं
भवदिति पनदावाहनादिस्वागतीकरणान्तेपूर्वेमयप्रतिष्ठितेदेवप्रतिष्ठितेनतकेंवुनाचामनदानमेव ततःपा
द्यं यद्भक्तिलेशसंपर्कात्परमानंदसंभवः तस्मैते चरणाब्जाय पाद्यं देवाय कल्पये इति पाद्यादकं निवेद्य
अर्घ्यं तापत्रयहरं दिव्यं परमानंदलक्षणं तापत्रयविमोक्षाय तवार्घ्यं कल्पयाम्यहं आचमनीयं वेदानाम। ६६

पिवेयाय देवनाय देवनात्मने आचमनं कल्पयामीशान शुद्धानां शुद्धिहेतवे इत्याचमनीयं पात्रस्थं जलमाचमनार्थं
दद्यात् मधुपर्कं सर्वकालस्थहीनायुपरिशुद्धिस्वात्मने मधुपर्कमिदं देव कल्पयामि प्रसीद मे इति कांस्यपा
त्रस्थं दधिमधुघृतेन निवेद्य पुनराचमनं दद्यात् उच्छिष्टोऽपि शुचिर्वापि यस्य स्मरणमात्रतः शुद्धिमाप्नोति तस्मै
ते पुनराचमनीयकं मिति ततः पादुके समर्प्य प्रार्थयेत् पादुके परिधायाद्य भगवन् स्नानमिति स्नानमंड
पमायाहि शुभमीशान दिग्गते इति प्रार्थ्य ईशानमंडपस्थं विभाव्य पुष्पादिभिर्वा सिंहासने मम सामिति द
त्वा ततो मूलमंत्रमन्त्रेणापि यवगोधूमतिलसर्षपामलकबिल्वचूर्णादिभिः उद्वर्तनार्थं दद्यात् मंत्रः त्वक्कान्तिदेव
कांतिकरं पवित्रं पापनाशनं उद्वर्तनं प्रयच्छामि देवदेव प्रसीद मे इति दत्वा उष्णोदकेन प्रक्षाल्य स्नानव
स्त्रं परिधाप्य पीठादिरवेजायमानैः पञ्चामृतैः क्षालयेत् ततः प्रथमं दुग्धस्नानं मंत्रः वृषस्य जनकं सर्वबल
मे धेनुसंभवं देवानां प्रीतं भक्त्या गृहाण महीधर इति ॐ पयः पृथिव्यामिति मंत्रेण शतपलपरिमितेन गोदुग्धेन
स्नानपलपरिमितेन तेन स्नाप्य परमानंदबोधाब्धिनिमग्ननिजमूर्तये सांगोपांगमिदं स्नानं कल्पयामि प्रसी
द मे इत्युष्णोदकेन स्नाप्य ॐ आपो हि ष्ठेत्यादि तिसृभिर्ऋग्भिः तीर्थोष्णोदकेनाष्टगुणपरि
तेनोदकेन च संस्नाप्य शतपलपरिमितेन गोदुग्धसंभवेन दध्ना स्नापयेत् मंत्रः पयोद्भवं बल
क्षीरसंभवं सर्वबलं मे गृहाण देवदेवेश स्नानार्थमिमं लं दधि इति दधिक्राव्णो इत्यनेन च संस्नाप्य पूर्व
वदुष्णोदकेन च संस्नाप्य सर्वदेवमग्निद्रव्यं मूलद्रव्यादष्टगुणेनोष्णोदकेन ततस्तैलेन शीतलोदकेन स्नपनका
रयेत् ततो घृतेन स्नपनं यज्ञसंसाधकं देव बलं मे बलवर्द्धने आज्यं गृहाण देवेश स्नानार्थायाति पवित्रक
मिति ॐ घृतवतीति मंत्रेणाथ च स्कंदादिस्नपनं पूर्ववत् ततो मधुना शतपलपरिमितेन स्नापयेत्

दे॰ प्र॰ ततो मधुना घृतपलपरिमितेन स्नपयेत् षट्पदैः साधितं पुष्पसंचयवचारुवल्लीकं मधुपानामरकं लंबं संग्रहा
णातमेमधु इति ॐ मधुवाता ऋतायते इति मंत्रेण च ततो चोदकस्नानं नमोदकपीतेनोदकस्नपनं पूर्व
६७ वदेवः ततः घार्कं यथा घृतपलपरिमितया स्नपयेत् रसनामोऽभ्यजनकरसमंथेनतु दिला स्नानायक्लृहे
वेश घार्कं यं देववल्लभो इति ॐ आप्यायध्वं समस्तु देवं समस्तु ध्येमनघं समाहितम् अपां रसस्य यो रसस्तं वो गृ
ह्णाम्युत्तमम् इति मंत्रेण च ततः पूर्ववद्दधि उदकस्नपनं अष्टगुणतमोदके पीतेनोदक एवं संस्नाप्य पुनः
परमानंदवोयाग्नि इति मंत्रेण चोदकेन स्नपनं विधाय कलशोदकेना ... हि इत्यादिभि घानकद्विंयेण च
संस्नाप्याचमनं दत्वा अंगप्रोक्षनवस्त्रं दद्यात् मंत्रः गात्रसंलग्नतोयस्य प्रोक्षके चंद्रपाण्डुरे गृह्याण देवदे
वेश त्वनुगृहैकतत्परं इति ततो पीतवस्त्र मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे निरावरणविज्ञानवाससे
कल्पयाम्यहं मिति परिधाप्यानंतरीयं परिधापयीत यमाश्रित्य जगत्माया जगत्संमोहिनी स्थिता तस्मैतेप
रमेशाय कल्पयाम्युत्तरीयकं मिति ततो देव्यै वासस्भागस्थिताये रक्तवाससी दत्वा आचमनीयं निवेद्य प
ञ्चोपवीतं देवाय निवेदयेत् यस्य शक्तित्रयेणेदं संप्रोतमखिलं चराचरं यज्ञसूत्राय तस्मै तेयज्ञसूत्रं प्रकल्पयेत्
इति परिधाप्याचमनं दत्वा प्रार्थयेत् पादुकायुग्ममाकल्प मत्नावनरत्ननिर्मिते आगच्छ निर्मितेन पद्मामले
कारस्यमंडपमिति प्रार्थ्यात्र भरणमंडपस्थितेदेवं विभाव्य आभरणानि दद्यात् स्वभावसुंदरांगाय नाना
शक्त्याश्रयाय च भूषणानि विचित्राणि कल्पयामि प्रसीद मे इति भूषणानि दत्वा सहस्रबिल्वपत्रनिर्मितां
मालां च दत्वा पुनराचमनीयं दद्यात् स्नानादिकं विधायाधिपतिः शुद्धिरस्याने पुनराचमनीयं तेन देवदेवप्र ६५०
सीदमे इति ततः पादुके परिधायेशायेवं वायपुरा स्मरं यागमंडपमायाहि परिवारगणैः सह तिष्ठार्थ्य पू

नामेउपमार्गेण विभाव्य समस्तदेवदेवेशं सर्वान्तर्यामिकं परं यन्मानि वेदितेन पुष्पं गृहीत्वा निःस्य शीतलं अर्वेडा
नेडमं सुवर्णं गृहाण जलस्नानमिन्या आचमनं दत्वा गंधेन विलेपयेत् परमानंदसौरभ्यपरिपूर्णदिगंतरे गृहा
णपरमं गंधं कृपया परमेश्वर इति नमोऽन्तेन अत्रमानारयो यस्य वर्तेनीवर्त दीर्घता: अर्घ्यं यामस्तर्गनं मेॐ
ऊमा सुणिना ब्र यामि ति ॐ ऊमा स्फाटिनाऽस्तिलकं दत्वा पुष्पाणि विविधमन्त्रवचांहि यामि ते गंधवाणिणा
सुगंधिविकसत्पुष्पमादरादर्पयाम्यहं मिति स्वेन पुष्पाणि अन्यवर्णानि च समर्प्य पञ्चैर पुष्पाणि वै बिल्वपत्रा
णि च समर्पयेत् सति संभवे सौवर्णं बिल्वपत्रं सौवर्णानि राजतानि वा यत्न रादि पुष्पाणि समर्पितानोपचारे दे
ववामभागस्थासनमामिष्य संपूज्य देवासनं गृहीत्वा आवरणपूजामारभेत् पूर्वादिदिक्षु कर्णिकायां देवस्य
पृष्ठभागे ॐ सद्योजाताय नमः प्रणवः सर्वत्र वक्ष्यमाणमेषामादौ प्रयोक्तव्यः वामभागे वामदेवाय नमः
दक्षिणभागे अघोराय नमः अग्रे तत्पुरुषाय नमः ईशानाय नमः ऊर्ध्वं प्रथम पुनः कर्णिकायामेव ॐ निवृ
त्तिकलायै नमः अग्नये प्रतिष्ठाकलायै नैरृत्ये विद्याकलायै वायव्ये शान्तिकलायै ईशाने शान्त्यतीतकला
यै अग्रे इति संपूज्य पुष्पाञ्जलिं गृहीत्वा मूलमन्त्रमुच्चार्य ॐ इत्याधेयाहिमां ति त्वं सर्वात्मन् शरणागते भक्त्या
निवेदये तुभ्यं प्रथमावरणार्चनमिति देवस्योपरि दद्यात् पुनरपि प्रथमावरणं ततः आग्नेयादिषु सर्वशक्तिया
न्त्र हृदयाय नमः आग्नेयकेसरेषु नित्यं तृप्तिधाम्ने शिरसे स्वाहा नैरृत्यकेसरेषु अनादिबोधशक्तिधाम्ने
शिखायै वषट् वायव्यकेसरेषु स्वतन्त्रशक्तिधाम्ने कवचाय हुं ईशानकेसरेषु अलुप्तशक्तिधाम्ने नेत्रत्रया
य वौषट् इति दत्वाग्र कर्णिकायां अनन्तशक्तिधाम्ने अस्त्राय फट् नमः इति पूर्वादिदिक्षु इति संपूज्य मूलम
न्त्राय अभीष्टसिद्धिं मे देहि शरणागतवत्सल भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनमिति पुष्पाञ्जलिं दद्या

दे॰ प्र॰ इतिद्वितीयावरणे ततः पूर्वादिषट्पत्रेषु नंदिनेनमः महाकालायनमः गणेश्वरायनमः वृषभाय॰ भृंगिरि
६८ टये॰ स्कंदाय॰ उमायै॰ चंडेश्वराय॰ ततोमूले अभीष्टसिद्धिमिति इतितृतीयावरणे ततः पूर्वादिषोडशदले
षु अनंतायनमः सूक्ष्मायनमः शिवोत्तमाय॰ एकनेत्राय॰ एकपदेत्रिमूर्तये श्रीकंठायवामदेवाय॰ ज्येष्ठा
य॰ श्रेष्ठाय॰ रुद्राय॰ कालाय॰ कलविकरणाय॰ बलाय॰ बलप्रमथनाय॰ इतिसंपूज्य मूलमंत्रेण अभीष्ट
सिद्धिमिति चतुर्थावरणार्चनमिन्दुचार्यपुष्पांजलिः इतिचतुर्थावरणे ततश्चतुर्विंशतिदलेषु पूर्वादिक्र
मेण अणिम्ने॰ महिम्ने॰ लघिम्ने॰ गरिम्ने ईशितायै॰ वशितायै॰ प्रकाम्यतायै॰ प्राप्त्यै ८ ब्राह्मि॰ माहेश्वर्यै॰
कौमार्य्यै॰ वैष्णव्यै॰ वाराह्यै॰ इंद्राण्यै॰ चामुंडायै॰ ८ असितांगभैरवाय॰ रुद्रभैरवाय॰ चंडभैरवाय॰ क्रोधभैर
वाय उन्मत्तभैरवाय॰ कपालिभैरवाय॰ भीषणभैरवाय॰ संहारभैरवाय॰ ८॥ २४॥ इतिसंपूज्य पुष्पांजलिं
गृहीत्वामूलं अभीष्टसिद्धिंपंचमावरणार्चनमिन्दुचार्य्यपुष्पांजलिंदेवायदद्यात् इतिपंचमावरणे ततः पूर्वादि
द्वात्रिंशद्दलेषु भवायनमः शर्वायनमः ईशानायनमः पशुपतयेनमः रुद्राय॰ उग्रायनमः भीमाय॰ म
हते ८ अनंताय॰ तक्षकाय॰ कुलिकाय॰ कर्कोटकाय॰ पद्माय॰ महापद्माय॰ शंखपालाय॰ कंबलाय॰ अश्वतराय ८॥
कैलासपृथिवे॰ हिमवते॰ गंधमादनाय॰ नीलाय॰ भरताय॰ नलाय॰ रामाय॰ ८ हिमवते॰ निषधाय॰ विंध्या
य॰ माल्यवते॰ पारियात्राय॰ मलयाय॰ हेमकूटाय॰ गंधमादनाय ८॥ ३२॥ इतिसंपूज्यमूले अभीष्टसिद्धिं षष्ठा
वरणार्चनमिति पुष्पांजलिंदेवायदद्यात् इतिषष्ठावरणे ततः पूर्वादिचत्वारिंशद्दलेषु इंद्राय॰ अग्नये॰ य
माय॰ निर्ऋतये॰ वरुणायवायवे॰ कुबेराय॰ ईशानाय ८ शच्यै॰ स्वाहायै॰ धूम्रायै॰ दिग्विन्यै॰ वारुण्यै॰ वायव्यै॰ ६९
कौबेर्यै॰ ईशान्यै॰ ८ वज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰ त्रिशूलायै ८ ऐरावताय॰

पुंडरीकाय॰ वामनाय॰ कुमुदाय॰ अंजनाय॰ पुष्पदंताय॰ सार्वभौमाय॰ सुप्रतीकाय॰ ८।४॰ इति॰ संपूज्य मूलमुच्चा
अभीष्टसिद्धिमिति सप्तमावरणार्चनमिति पुष्पांजलिं देवायविदध्यात् इति सप्तमावरणं ततः पद्माद्बहिर्भूगृहे मध्यमा
दिक्षु इन्द्राय॰ अग्नये॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ वायवे॰ कुबेराय॰ ईशानाय॰ निर्ऋतिवरुणयोर्मध्ये॰ अनंताय॰
पूर्वेशानयोर्मध्ये॰ ब्रह्मणे॰ तथैव आग्नेये॰ विरूपाक्षाय॰ नैर्ऋत्ये विरूपाय॰ वायव्ये पशुपतये॰ ईशाने ऊर्ध्वलिंगाय नमः
इति संपूज्य मूले अभीष्टसिद्धिं अष्टमावरणार्चनमिति पुष्पांजलिं दद्यात् इत्यष्टमावरणं ततः पूर्वाद्यष्टदिक्षु भूगृ
हे वज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदाय॰ शूलाय॰ निर्ऋतिवरुणयोर्मध्ये चक्राय॰ पूर्वेशानेमा
वेनवाले पद्मायनमः इति संपूज्य मूलं अभीष्टसिद्धिमिति नवमावरणार्चनमिति पुष्पांजलिं देवाय दद्यात् इति न
वमावरणं ततो भूगृहाद्बहिः पूर्वाद्यष्टदिक्षु शेषाय॰ तक्षकाय॰ अनंताय॰ वासुकये॰ शंखपालाय॰ महापद्माय॰ कंब
लाय॰ कर्कोटकाय॰ इति संपूज्य॰ मूलमुच्चार्य॰ अभीष्टसिद्धिं मे देहि शरणागतवत्सल भक्त्या समर्पये तुभ्यं दशमाव
रणार्चनमिति पुष्पांजलिं देवायविदध्यात् इति दशमावरणं एवमावरणान्यभ्यर्च्य धूपंमेप्राद्य वनस्पतिरसोद्भवो
गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां दीपोयं प्रतिगृह्यतामिति घंटावादनपुरःसरं धूपं निवेदयः देवदक्षिण
भागस्थितवर्तिगव्यघृतदीपं संस्थाप्य वामभागे रक्तवर्ति पुष्पादिवासिततैलदीपं संस्थाप्य संपूज्य संप्रोक्ष्य संपू
ज्य अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्व
र्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति मन्त्रेण सुप्रकाशो महादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरज्योति
र्दीपोयं प्रतिगृह्यतामिति तथैव निवेदयेत् नैवेद्यं नानाव्यंजनयुक्तं द्रोणपरिमितौदनं नैवेद्यं भक्ष्यलेह्यचोष्यपेया
त्मकं समर्पयामीत्यर्घजलं देवदक्षिणहस्ते दद्यात् सैवां सिसैजे ततः सुवासितजलमाचमनीयार्थं दत्वा ॐ प्राणादि स्वा

दे॰प्र॰ इत्यादिमंत्रैः प्राणादिमुद्राः प्रदर्श्य पंचग्रासान्ग्राहयित्वा जलं समस्तदेवदेवेश सर्वतृप्तिकरं परं अन्यातिवेदितेभ्रुडंप्रकृ
६४ तिस्थसुशीतलं अखंडानंदसंपूर्णं गृहाण जलमुत्तममिति सुवर्णादिपात्रस्थजलं निवेद्य जवनिकया भोजनस्थ
लं संवेष्ट्य अलेशायैः सुरैर्देवैः सर्वसमभितः समुपविष्टः समेतो देव्यासिंजद्वलकरया मादरं वीज्यमानः नमः क्रीडाप्र
हसन्मुखोद्दाम्यपत्नीभोज्यं भक्ष्यं पात्रे कनकघटिते षड्रसानिष्टदेवः इति मुहूर्तं विभावयंस्तिष्ठति नमः उमराघोषा
नंदत्वा ईशाने चंडेश्वरायनमः इति गंधपुष्पाक्षतैः संपूज्य मंत्रः बानरावणचंडीशनंदिभृंगिरिटादयः सदेश्वर
प्रसादं मे सर्वे गृह्णन्तु शाम्भवा इत्युच्छिष्टं चंडेश्वरादिभ्यो निवेद्य हस्तप्रक्षालनार्थं जलं दत्वा यस्य प्रसादेन तुष्टाः संजाताः
सततं द्विषः तस्मै देवाय यच्छामि गंडूषार्थमिदं जलमिति भृंगारादिस्थितजलं निवेद्य यत्तीर्थपादयोर्यस्य सर्वदात
स्वराः स्वराः तस्मै देवस्य यच्छामि गंडूषार्थममत्रकमिति गंडूषपात्रं पुरतः संस्थाप्य ताम्बूलं प्राचीने देवताम्बूलं दद्यात्
तमालदलकर्पूरपूगभागरंतरंगितं सुशोभकं सुगंधं च ताम्बूलं देव गृह्यतामिति स्वर्णादिपात्रस्थं ताम्बूलं निवेद्य भोज
नस्थलं संशोध्य वितानादिसमर्पयेत् यशः संदृश्च विस्तीर्णयस्य तिष्ठति शोभनः तस्मै देवस्य यच्छामि वितानं सर्वे
कादं इति वितानं अथ छत्रं वर्षातपभवा बाधा यतो नो जायते क्वचित् देवेश गृह्णतां यदे मानपत्रं सुनिर्मलं इति छत्रं
अथ चामरं यस्य संदोलनान्नित्यं तापत्रयकर्षः किल विज्यते तदिदं चामरं देव गृहाण चमरीभवं इति चामरं अथ व्यजनं भक्त
संतापदलनं नित्यानंदसमन्वितः व्यजनं गृह्ण देवेश शैत्यानंदकरं परं इति व्यजनं अथ दर्पणं यस्य संदर्शनात् चक्रं सत्यस्य
किल प्रत्ययः जायते तदिदं गृह्ण दर्पणं देव मंगलं इति दर्पणं अथ उपानहौ पंककंटककंकस्पर्शाबाधिके यादरक्षिके
उपानहौ मया दत्ते गृहाण परमेश्वर इत्युपानहौ अथ ध्वजाः आकाशचारिणां शुभ्रं शुद्धदेहेन संभृते ध्वजं गृहाण ६४
देवेश समराङ्गणभूषण इति ध्वजपताका इति वितानादिसमर्प्य जपं विधाय गुह्यातिगुह्येति संपुष्पोदके देवद

क्षिणहस्तेदत्वा अथआरात्रिकं कर्पूरार्तिकं अष्टोत्तरशतनिष्ठमथदीपैर्गीतवाद्यादि रवैर्जायमाने महानीराज
नंविधाय अष्टोत्तरसहस्रनामभि र्ष्टशतनामभिर्वाप्रणवादिनमोन्तैर्बिल्वपत्रादिभिः पूजा तत्राष्टोत्तरशतना
ममंत्रः यथा ओंशिवाष्टोत्तरशतनाममंत्राणां नारायणऋषिः रनुष्टुप्छंदः श्रीसदाशिवो देवता
गौरीशक्तिः पूजनेविनियोगः ओंकारःसर्वत्रमंत्राद्यादौज्ञेयः ओंशिवायनमः ओंमहेश्वरायनम इत्यादि ततोष्टमू
र्तिस्तदधिपांश्चपूजयेत् मंत्रा यथा ओंपृथिवीमूर्तयेनमः ओंपृथिवीमूर्त्यधिपतयेशिवायनमः ओंअग्निमू
र्तयेनमः ओंअग्निमूर्त्यधिपतयेपशुपतयेनमः ओंयजमानमूर्तयेनमः ओंयजमानमूर्त्यधिपतयेनमः उग्रा
य· अर्कमूर्तये· अर्कमूर्त्यधिपतये रुद्राय· ओंजलमूर्त्यधिपतयेनमः ओंजलमूर्त्यधिपतयेभवायनमः ओं
वायुमूर्तयेनमः ओंवायुमूर्त्यधिपतयेईशानायनमः ओंसोममूर्तयेनमः ओंसोममूर्त्यधिपतयेमहादेवाय
नमः ओंआकाशमूर्तयेनमः ओंआकाशमूर्त्यधिपतयेभीमायनमः ओंइत्यष्टौमूर्तीस्तदधिपांश्चगंधादिना
संपूज्य देवस्यप्रणामंकुर्वीत यथा सर्वतत्त्वानविज्ञानेतिनयेदेवजयादेवेन्यादिपूजानिर्गिविज्ञापयेत् इति
कृत्वा दक्षिणासंकल्पंकुर्यात् देयद्रव्यंसंप्रोक्ष्यसंपूज्य देशकालौसंकीर्त्यामुकोहं यथाशक्तिफलावाप्तये कृ
तस्यशिवमहापूजनस्यसांगुण्यार्थमिदंसुवर्णं मग्निदैवतमन्यद्द्रव्यं यथालाभंविभज्यसंप्रददे इतिसंक
ल्पदक्षिणांदत्वा विप्रैरभिषेकतिलकमंत्रपाठादिकारयित्वा क्षेत्रपालायबलिंदद्यात् अद्येहसर्वारिष्टशा
न्तिपूर्वकसकलाभ्युदयावाप्तयेक्षेत्रपालायपूजनपूर्वकंबलिदानंकरिष्ये इति रक्तचंदनेनभूमौत्रिकोण
गर्भचतुरस्रमंडलेविलिख्य तत्रसकलावलमदीपसद्व्यंसरामबलिंसंस्थाप्य ध्यायेत् आनद्दक्रमटापवि
नयनंनीलांजनाद्रिप्रभंदोर्दंडातगदाकपालमरुणस्रग्गंधवस्त्रावृतं घंटाघुर्घुरमेखलंधृततिलसत्केकाश्मी

दे॰ प्र॰ मेखिभं वंदे संहितनर्व्यउडलधरं श्रीक्षेत्रपालं सदैवेति ध्यात्वा रक्तचंदनादिभिः संपूज्य ह्रौं क्षेत्रपालाय भूत
प्रेतपिशाचडाकिनीशाकिनीवेतालादिपरिवारयुताय एष सदीपः समांसः सदक्षिणः कृशरान्नबलिर्न
७० मः भोभोः क्षेत्रपाल इमं बलिं गृहाण सपुत्रपरिवारस्य यजमानस्यायुः कर्ता क्षेमकर्ता पुष्टिकर्ता शान्तिकर्ता भ
वेत्युच्चार्य जलेन त्रितिदिक्ष्वबलिं न ब्राह्मणेन चतुष्पथे निक्षेपयेत् ततो योः शांतिवितत्यानं संमोद्यदृसोया
दो अक्षाल्याचम्य देवं प्रदक्षिणीकृत्य यथास्थानं विहरेत् इति श्रीमहा...विधिः पलानां तु सहस्रेण म
हास्नानं प्रकीर्तितं देवदक्षिणभागे ध्वजं वामभागे पताकां स्थापयेत् देवस्य दक्षिणभागे महाघृतदीपं वामभा
गे तैलमहादीपं स्थापयेत् देवाग्रे द्रोणपरिमितान्ननैवेद्यं नैवेद्यांश्च तदर्धांशेन घृतेन तावतान्तैलेन चतुष्पथ
दीपद्वयं पूरणीयं द्रोणप्रमाणं तु कं पलं चतुः उडवः प्रस्था आढकोद्रोण एव च धान्यमानेन वोद्धव्याः क्रम
शोमी चतुर्गुणा इति अन्यत्र तु अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलं पुष्कलानि च चत्वारि आढकः परि
कीर्तितः चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणमिति अथ स्नानवेदीद्वारपालजप्यसूक्तानि तत्र प्रथमं
श्रीसूक्तपाठः ततः पवमानं च सोमसूक्तं सुमंगलं शांतिध्यायं चेंद्रसूक्तं रक्षोघ्नं चेति वक्ष्याः पठेयुरिति
शेषः श्रीसूक्तं हिरण्यवर्णामिति पंचदशर्चं १५ तन्मासादस्नपनकारणोल्लिखिते पवमानसूक्तं स्वादि
ष्ठयेत्यादि सोमसूक्तं त्वं सोमासीत्यादि सुमंगलं कनिक्रदज्जनुषमित्यादि शाक्तेत शान्त्यध्याये शमिंद्राग्नी
इत्यादि वर्गत्रयं इंद्रसूक्तं यो जात एवेत्यादि रक्षोघ्नं कृणुष्व पाजः इत्यादि यथा हिरण्यवर्णा १५ ॐ स्वादिष्ठ
या मदिष्ठया पवस्व सोम धारया इंद्राय पातवे सुतः १ रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् द्रुणासधस्थमा ७०
सदत् २ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः पर्षि राधो मघोनाम् ३ अभ्यर्ष महानां देवानां वीतिमंध

सा अभिवाजमनुश्रवा ४ त्वामच्छावरामसि तन्दिदर्थे दिवेदिवे इन्द्रो नेन आससः ७ नात्तनेपरिष्कृते सोमं स्तुध्ये
स्पड्विताः वारेणपाश्वनानतानमीमणवीः समर्थं अग्मन्भात्तिपोषणोदशस्वसारः पार्थ्यदिविद्युत्समीहि नृत्र
प्रवोयमन्तिवाजकेड्डुति त्रिधातुवारुणंमध्व अभीरममग्नाउ श्नावनिपेनवः धोत्त्सोममिन्द्रायपाभव
अस्येहीन्द्रो मदेष्वाविश्वाहूत्राणिजिघ्नसे प्रभरोमघवाचमहन्ते २ पवस्वदेववीरतिपवित्रंसोमभरेत्वा इन्द्रमिन्द्रो
हृषाविशा आवच्यस्वहिपरोहर्बन्धोघकत्त्ववत्रमः आपानिवरणसिमदः अफल्तिनप्रियेमफहारास्तनस्येव
यसः अपोवशिष्टस्कनः महान्तन्त्वामहीरन्ववायोअर्षन्तिमिन्धवः यद्गोभिर्वासयिष्यसे समुद्रोअप्सुमामृ
जेविष्टम्भोधरुणोदिव सोमपवित्रेअस्मयुः ३॥ अचिक्रदद्वृषाहरिर्महान्मित्रोनदर्शत संसूर्येणरोचते गि
रस्तइन्द्रओजसामर्मृज्यन्ते अपस्युवः याभिर्मदायशुम्भसे तन्त्वामदायघृष्वय उलोककृत्नमीमहे तवश्रशस्त
यो महीः अस्मभ्यमिन्द्रविन्दुयुर्मदः पवस्वधारया पर्जन्यो वृष्टिमाँ २ इव गा धा इन्द्रो नत्वधा अस्यस्वमा वाजसाउ
त आरभ्मायतस्तुञ्चाः ५ हृषदेवोअमर्त्यः पणीविविदीयति अभिद्रोणान्यासदे पवदेवा विपस्कनो तिह्वा
रांसि धावति पवमानो अदाभ्यः पषदेवो विपन्युभिः पवमानऋतायुभिः हरिर्वाजाय मृज्यते पषविश्वा
निवार्याशूरो यन्निव सत्वभिः पवमानसिषासति पषदेवो रथर्यति पवमानोदशस्यति आविष्कृणोति व
ग्वरम् इति पवमानसूक्तं अथ सोमसूक्तम् त्वं सोमप्रचिकितो मनीषा त्वं रजिष्ठमनुनेषि पन्थाम् तवप्रणी
तीपितरो न इन्द्रो देवेषु रत्नमभजन्तधीराः त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः त्वं वृषा
वृषत्वे भिर्महित्वा द्युम्नेभिर्द्युम्न्यभवोनृचक्षाः राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोमधाम शुचिः
त्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु त्वं नो

दे· प्र· मित्रो विधेम सुमना अहेलन् राजन्त्सोम प्रति हव्या गृभाय त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा त्वं भद्रो असि क्रतुः १ त्वं च
सोम नो वशो जीवातुं न मरामहे प्रियस्तोत्रो वनस्पतिः त्वं सोम महे भगं त्वं यून ऋतायते दक्षं दधासि जीवसे १
७१ त्वं नः सोम विश्वतो रक्षा राजन्नघायतः न रिष्येत्त्वावतः सखा सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे ताभिर्नोऽविता
भव इमं यज्ञमिदं वचो जुजुषाण उपागहि सोम त्वं नो वृधे भव २ सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः सु
मृळीको न आविश ॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमित्रः सोम नो भव सोम रारन्धि नो हृदि गा
वो न यवसेष्वा मर्य इव स्व ओक्ये यः सोम सख्ये तव रारणद्देव मर्त्यः तं दक्षः सचते कविः उरुष्या णो अभिशस्तेः
सोम नि पाह्यंहसः सखा सुशेव एधि नः ३ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा वाजस्य संगथे आप्यायस्व
मदिन्तम सोम विश्वेभिरंशुभिः भवा नः सुश्रवस्तमः सखा वृधे सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमा
तिषाहः आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व या ते धामानि हविषा यजन्ति ता ते विश्वा परि
भूरस्तु यज्ञम् गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं क
र्मण्यं ददाति सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ४ अषाढं युत्सु पृतनासु पप्रिं स्वर्षाम
प्सां वृजनस्य गोपाम् भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम त्वमिमा ओषधीः सोम विश्वास्त्वम
पो अजनयस्त्वं गाः त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ देवेन नो मनसा देव सोम रायो भागं सह
सावन्नभि युध्य मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ५ इति सोमसूक्तं अथ शाकुनसूक्तं ॐ कनि
क्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या वि ६४
दत् मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवा

शिवदेहः अवक्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते मा न स्तेन ईशत माघशंसो बृहद्व
देम विदथे सुवीराः १ प्रदक्षिणिदभिगृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः उभे वाचौ वदति सामगा इ
व गायत्रं च त्रैष्टुभं चानु राजति उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि वृषेव वाजी
शिशुमतीरपीत्या सर्वतो नः शकुने शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद आवदंस्त्वं शकुने भ
द्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः २ भद्रं व
द दक्षिणतो भद्रमुत्तरतो वद भद्रमदस्तान्नो वद भद्रमुपरिष्टान्नो वद भद्रं भद्रं न आ वद भद्रं नः सर्वतो वद अ
सपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे यौवनानि महयसि जिग्युषामिव
दुन्दुभिः शकुन्तक प्रदक्षिणं शतपत्राभि नो वद आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि
नः इति शाकुनसूक्तं अथ शान्त्यध्यायः ॐ शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या शा-
मिन्द्रासोमा सुविताय शंयोः शं नः इन्द्रापूषणा वाजसातौ शं नो भगः शमु नः शंसो अस्तु शमु नः पुरंधिः श
मु शन्तु रायः शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु शं नो धाता शमु धर्ता नो अस्तु शं नः
उरूची भवतु स्वधाभिः शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु शं नो अग्निर्ज्योतिरनीको
अस्तु शं नो मित्रावरुणावश्विना शम् शं नः सुकृतानि सन्तु शं न इषिरो अभि वातु वातः
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिर
स्तु जिष्णुः शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः शं नो रुद्रो रुद्रेभिर्जलाषः शं नः त्व
ष्टाभिरिह शृणोतु शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः शं नः स्वरूणां मित

दे॰ प्र॰ योभवन्तु शन्नः प्रश्वः शम्वस्तु वेदिः शन्नः सूर्य उरुचक्षा उदेतु शन्नः चतस्रः प्रदिशो भवन्तु शन्नः पर्वता ध्रुवयो भव
न्तु शन्नः सिन्धवः शमु सन्त्वापः शन्नो अदितिर्भवतु व्रतेभिः शन्नो भवन्तु मरुतः स्वर्काः शन्नो विष्णुः शमु पूषा
७२ णो अस्तु शन्नो भवित्रं शम्वस्तु वायुः शन्नो देवः सविता त्रायमाणः शन्नो भवन्तूषसो विभातीः शन्नः पर्जन्यो भव
तु प्रजाभ्यः शन्नः क्षेत्रस्य पतिरस्तु शंभुः शन्नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु शमभिषाचः शमु
72 रातिषाचः शन्नो दिव्याः पार्थिवाः शन्नो अप्याः शन्नः सत्यस्य पतयो भवन्तु शन्नो अर्वन्तः शमु सन्तु गावः शन्न ऋ
भवः सुकृतः सुहस्ताः शन्नो भवन्तु पितरो हवेषु शन्न अज एकपाद्देवो अस्तु शन्नोऽहिर्बुध्न्यः शं समुद्रः शन्नो
अपान्नपात्पेरुरस्तु शन्नः पृश्निर्भवतु देवगोपाः आदित्या रुद्रा वसवो जुषन्ते इदं ब्रह्म क्रियमाणं नवीयः शृण्वन्तु
नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ते नो रास
न्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः सङ्कुन्या अमित्रा भवत शीर्षाणोऽहय इव तेषां वो अग्निदग्धा
नामग्निमूढानामिन्द्रो हन्तु वरं वरम् सञ्चामि त्वाहं विषा जीवनाय यमज्ञातयक्ष्मादुत राजयक्ष्मात् ग्राहिर्जग्रा
ह यद्यैवतदेनं तस्या इन्द्राग्नी प्रमुमुक्तमेनं यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव तमाहरामि
निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनं शतं यथेमं श
रदो नयातीन्द्रो विश्वस्य दुरितस्य पारे शतं जीव शरदो वर्धमानः शतं हेमन्तान्छतमु वसन्तान् शतमिन्द्राग्नी सवि
ता बृहस्पति शतायुषा हविषेमं पुनर्दुः आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च
तेविदम् १ त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानां अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमि ७२
हा हुवेम इन्द्रस्येव रातिमाजोहुवाना स्वस्तये नावमिवारुहेम उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ

विश्रामः सखायस्त्रियः शवसा पावकाह्निः सूर्य इव ज्योतिषापस्ततान सहस्रसाः शतसा अस्य रंहिर्न स्मा वारन्ते युवतीं
न शर्य्याम् सूक्तं महित्रीणामवोस्तु द्युक्षं मित्रस्यार्य्यम्णः दुराधर्षं वरुणस्य नहि तेषाममा चन नाध्वसु वारणेषु
ईशे रिपुरघशंसः यस्मै पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योतिर्यच्छन्त्यजस्रं २ तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं
